तए णं **पभवाइ**पंचसया सण्णद्धबद्धा, ससत्था, सधणुंआ, सउडुणो, सकुंता जेणेव **रायगिहे** दुवारे तेणेव उवागच्छंति। उवागच्छित्ता तालोग्घाएणविज्जा-जोए तालगं उग्घाडेंति। मज्झे मागया पच्छादारं पेहेंति। सिग्घं तुरियं चवलं जेणेव **जंबू**गेहे तेणेव उवागच्छंति। उवागच्छित्ता विज्जाए तालगं उग्घाडेंति। तए णं **पभवे जंबू**गेहे भारीया **जंबू** अनिद्दं पासइ पासित्ता **पभवे** असोवणिं दलइ दलइत्ता एगं **जंबू** विणा सव्वे जणा निद्दा पयाया। तए णं ते **पभवे** तेणे पंचसया सद्धिं **जंबू**गिहे पविट्ठा। तं गिहमज्झगेहे जालए, मालए, गवक्खे, कट्ठघरं, पडघरं, भूमिघरं, मंजुसए, पेईए, पटारिए, करंडे, गवालए, पुहवीभायणे, तेयभायणे, कट्ठभायणे। जे जेहिं वत्थं, सुवण्णं, पत्तं, रयणं, मुत्तावलयणं, विद्दुमं, हीरण्णं ते तेहिं सव्वे एगओ मेलंति। गहणट्ठाए मोटयं बंधंति।

---

समधिगम्य न भोगान् भोक्ष्यन्ति ये मूढास्ते पुनर्वराका बहु शोचयिष्यन्ति। पुनर्मनुष्यभवो कथं लभिष्यति। दशभिर्दृष्टान्तैर्दुष्प्राप्यस्तत्प्राप्यभोगसामग्रीभोगान् भुङ्क्ष्व च यथा धर्मस्तथा कर्म साधनसाम्यत्वेन मनुष्यभवोपलब्धिर्दुरापाऽस्ति। तस्माद् हे प्रिय! अस्मच्छरीरभोगं विलसय पश्चाद्भो-गाभिलाषं सम्पूर्य जरासमये संयमे साधुमार्गे साधनपरायणा भविष्यत। अन्योऽन्यमेवं संलपमानाः सन्त्यो विचरन्ति।

तस्मिन्काले तस्मिन्समये **राजगृह**नगरासन्ना चौरपल्ल्यस्ति। तत्र **प्रभव** नामा स्तेनाधिपः परिवसति कुव्यसनासक्तः समर्थः। पुनः किंविशिष्टः? मांसाहारी, सुरापानी, वेश्यादासीविधवापरस्त्रीगमनपरः, पञ्चेन्द्रियसंहरणपरः, चौरलक्षणकुशलः, प्रपूर्णः, व्यसनसप्तकमेतत् तेषु समर्थः। स **प्रभव**नामा स्तेनः पञ्चशतचौरैः परिवृत्तः, पुनरधर्मी, अधर्मीख्यातिः, धर्मेष्टः, पापी, घातकः, परलक्ष्मीग्रहणसावधानः, समर्थः, शूरः। ततः स **प्रभवो** यदा राजगृहवप्रगोपुरद्वारे रात्रिसमये प्रथमयाममध्ये प्राविश-त्प्रोद्घटिते सति पश्चादपररात्रे पश्चिमप्रहरे पुराद्बहिर्निष्क्रामति। लोकादलक्षीभूतः सन्तिष्ठते। इत्थं चौर्य्यं कुर्वन्नन्यदा तेन **प्रभवेण** पञ्चशतमलिम्लुचाः शब्दापिता एवमवादीत्-

तए णं से **जंबू** नाम समणोवासए एवं अब्भत्थिए। अहं विभायकाले सव्वं चयइ संजमेणं विहरिस्सामि। पुण लोगमज्झे हीलस्सइ। को वि मज्झिमपुरिसो भासिस्सइ। धणं पणट्ठा पच्छा उत्तमपुरुसं किं कीरइ। तेणट्ठेणं संजमं एस गिण्हइ। पुण मया एस पंचसया समकालं न गिण्हइ। एवं अब्भत्थिए। एवं वयइ - "**नमो अरिहंताणं**" एस पदप्पसाए पंचसया **पभवाइ** तेणा थंभीया जहा सेलथंभा तहा। जे जेहिं ते तेहिं टगमग सव्वं विलोइया। तया णं **पभवे** एवं अब्भत्थिए - एसा विज्जा रम्मा नरतिरियथंभणी। को वि नरेणं मम असोवणीअं न भिण्णा। दिसा विलोयमाणे **जंबू** पल्लंके ठिया पासइ पासित्ता हट्ठा जेणेव **जंबू** तेणेव उवागच्छइ उवागच्छइत्ता वंदइ वंदइत्ता एवं वयासी - धण्ण धण्ण **जंबु**! जेण अहं मंतबले थंभिया। **जंबु**! अहं तुमं दुविज्जा दाएमि। तुमं मम एगं थंभिणीविज्जा देहि। तया णं **जंबू** धम्मट्ठाए भावेणं एवं वयासी - **पभवा !** मया विज्जाए नत्थि कामं। ए सव्वे विज्जा अविज्जा एग धम्मं विणा। तम्हा अहं विभायसमए ए सव्व धणे

---

भो स्तेनाः ! सर्वे मत्साकं समायान्तु। भो अद्य सर्वे मिलित्वा **राजगृहे** प्रविशामः। यत **ऋषभपुत्र**पाणिग्रहणावसरे तस्यावासे नवनवतिकोटिमानं सुवर्ण-मागतमस्ति। अतोऽद्य यूयं तन्मन्दिरे प्रचलन्तु। तद्धनं वयं गृहीष्यामः। इत्थं विचिन्त्यान्योऽन्यं संलपन्ति, संजल्पन्ति।

ततः **प्रभवादयः** पञ्चशतस्तेनाः सन्नद्धबद्धाः, सशस्त्रा, सधन्विनः, सखड्गाः, सकुन्ताः, सकवचाः, चर्मखेटका प्रस्थिताः। यत्र राजगृहनगरासन्नं तत्रैवोपागच्छन्ति। तत्रोपागत्य च तालोद्धाटनविद्यायोगेन गोपुरद्वारतालमुद्धाटयन्ति। यत्नेन यन्त्रमुद्धाट्य च पुरान्तः समायाताः। समेताः पश्चाद्द्वारं संपिदधन्ति स्थगयन्ति। तत्र शीघ्रं चपलं यत्र **जम्बू**गृहं तत्रैवोपागच्छन्ति। तत्र समागत्य च तालोद्धाटनविद्यया तालकमुद्धाटयन्ति। ततः स **प्रभवो जम्बू**गृहे प्रविष्टः पञ्चशतपरिवृतः। ततो **जम्बूं** भार्यासहितमनिद्रं पश्यति। दृष्ट्वा च **प्रभवो**ऽवस्वापिनीनिद्रां ददाति। ततस्तस्यां दत्तायामेकं **जम्बू**कुमारं विना सर्वे वेशमवासीजना दासदासीप्रमुखा निद्रावशेन घूर्मिता

अंतेउरं चिच्चा संजमं गिण्हामि। **पभवो** वयइ – **जंबु !** एस रिद्धि-धण, एसा नवजुव्वणा सरिसया जाव नो अण्णाए सह पच्चक्खसुहं केणट्ठेणं मुच्चिस्सइ। पुण पुण एस सुहं किहं पाविस्सइ । अहं तव सेवयं भविस्सइ । तम्हा एस सुहं विलासेह । तए णं **जंबू पभवेणं** एवं वयासी – **पभवा !** एस सुहं किं? एणं जीवेण देवसुहं अणुभविया। विविह कामभोगं विलस्सइ। **पभवा** ! एस जीवे सुहे नो तप्पिया जाया तया अपुव्वं मन्नइ । जम्मजरामरणदुक्खं नो पिच्छइ । जहा बिडालो पयं पासइ पुण जट्ठिया नो पासइ । तहा जीवं भोगभोगं पिच्छइ । पुण परलोअं नो पिच्छइ जहा महुबिंदुए पुरिसे। तए णं **पभवे** एवं वयासी-**जंबू !** ते कुण महुबिंदुए पुरिसे? तए णं से **जंबू** एवं वयासी –

## महुबिंदुजे दिट्ठंतो

**पभवा !** को वि पुरिसे महासत्थोवगए। अण्णया को वि सत्थवाह सद्धिं अण्णजणवए निग्गयो । ते पुरिसे अण्णया मग्गसत्थभट्ठो, पंथचुक्को । किहं पहे न

---

निद्रापरवशका जाताः। ततः स **प्रभव**श्चौरः सपञ्चशतश्चौरो **जम्बू**मन्दिरान्तः प्रविष्टः। तद्यथा – गृहमध्ये, गृहालके, जालिके, गवाक्षे, काष्टगृहे, प्रतिगृहे, भूमिगृहे, गर्भागारे, मञ्जूषिकायाम्, पेटिकायाम्, पिटारके, करण्डके, गवालये, मृद्भाजने, ताम्रभाजने, काष्टभाजने । यत्र यत्र वस्तूनि वसूनि च सर्वाण्यप्येकतो मेलयन्ति, संयोजयन्ति, ग्रहणार्थं पोटकं बध्नन्ति, महत्पटं विस्तार्य ग्रन्थिं निबध्नन्ति।

ततः सो **जम्बू** नाम श्रमणोपासकस्तस्यैवंविधमभ्यर्थितम्, चिन्तितम्, प्रार्थिततम्, मनोगतम् सङ्कल्पं समुत्पन्नम्। विचारयति अहं प्रातःकाले सर्वस्याप्येनं त्यक्त्वा संयमेन विचरिष्यामि, संयमं गृहीष्यामि। तथापि पुनर्लोकमध्येऽवर्णवादो हीलना भविष्यति। कथम् ? केऽपि मध्यमाधमपुरुषा भाषयिष्यन्ति – धनप्रणष्टे द्रव्यनाशे सति पश्चादुत्तमपुरुषाः किं क्रियन्ते उत्तमैः किं कार्यमित्यर्थः। यतो यावद्धनं तावत्सर्वे स्वजनपरजनाश्च संतुष्यन्ति। प्रेमभावं च रक्षन्ति। निर्धनानां लोकरीत्या मृतकप्रायत्वात्। यतो निर्धनाः शवसमत्वेनेति धर्मकर्मकरणाक्षमत्वात्। तेनार्थेनाहं

लब्भइ। तेणं समएणं मत्तमातंगे ते पुरिसे हणणट्ठाए सम्मुहं धावमाणे पासइ। तया णं ते पुरिसो पणट्ठो भयभीयो पहमज्झे एगं महाकुवं पासइ। भयवसियो ते पुरिसो कुवं पविट्ठो। तया णं कुवमज्झे वटवल्ली विलग्गा अहे विलोयइ। कुवमज्झंते एगं महाअजगरे मुहे वियासमाणे पासइ। तस्स कुवे चत्तारि कुणे चत्तारि महाविसमए पयंडसरीरं पण्णगं पासइ। जया णं उवरि विलोयइ तया णं से वटवल्लीमूले दो मूसा कोरइ। तया णं ते गयंद रोसजोए निग्गोहे साहा भंजणट्ठाए हल्लोलइ। तया णं तेण साहाए महुआलए, महुपूरिए अत्थि। से महुआमच्छी तत्थ पुरिससरीरे तीक्खणडंके डसइ। रोमरोमे विलग्गइ। हत्थवल्ली विरुहा से मच्छी सरीरेण नो उडाएइ। तेणं

---

त्ववश्यं संयममाचरिष्यामि। पुनर्मयैते पञ्चशतचौराः समकालं ग्रहीतुमशक्याः। द्रव्यरक्षणोपायोऽपि करणीयः। एवमभ्यर्थितवान् सङ्कल्पितवान्, ततो विचिन्त्यैवमवादीत् – '**नमो अरिहंताणं**' एतत्पदप्रभावेण समस्तास्तस्कराः पञ्चशतप्रमाणाः स्तम्भिताः शैलस्तम्भवत्। ये यत्र स्थितास्तत्र निश्चला पुस्तकचित्रवत्, अन्योऽन्यं टिग्टिगायन्ते। शक्तिप्रतिहताः पुनः पुनर्विलोकयन्तो निश्चेष्टास्तर्कयन्तश्चिरेण ते किमयं देवरूपो वा नररूपधरः पुमान् **जम्बू**स्वामिस्वरूपं विचिन्तयन्ति।

तदानीं **प्रभवो** मनस्येवमभ्यर्थितवान् – यदेषा **जम्बू**विद्या रम्या नरतिर्यक्स्तम्भिनी। एतस्याग्रे मदीयावस्वापिनी निस्तेजस्का जाता। इयन्ति दिनानि यावन्ममावस्वापिनीनिद्रा केनापि न भिन्ना। न निवर्तिता। एवं दिगवलोकनं कुर्वन् यावद्विचारयन् विचरति तावता **जम्बू**कुमारं पर्यङ्के स्थितं पश्यति। हृष्टस्तुष्टो यत्रैव **जम्बू**स्तत्रैव समेति। समायाति वन्दते, **जम्बूं** वन्दित्वा **प्रभव** एवं वदति – धन्य धन्य **जम्बू**! येन त्वयाऽहं मन्त्रबलेन स्तम्भितोऽस्मि जितोऽस्मि च। **जम्बू** त्वामहं द्वे विद्ये सप्रभावे दद्मि। मां त्वमेकां स्तम्भिनीविद्यां देहि। ततो **जम्बू** तद्वचनं श्रुत्वा धर्मार्थं **प्रभवं** प्रत्येवमवादीत् – भो **प्रभव**! मम विद्याया नास्ति कार्यम्, एताः सर्वा विद्या अविद्या अविद्यारूपाः। एका धर्मविद्या सुविद्या। यतः

समएणं ते महुमंडवे महुबिंदुअं गलइ। से पुरिसमुहे बिंदुअं पडइ। जीहे आसायइ महासवायं वेयइ।

**पभवा** ! तए णं समएणं को वि विज्जाहरे विमाणठिआ तत्थ जत्तट्ठाएणं आयासं चलमाणे तेण विज्जाहरभारिया ते कुवपुरिसे संकडे पासइ। करुणाभावए पियं पइं एवं वयासी-पाणवल्लह! विमाणं चिट्ठावह! एस कुवपुरिसे संकडे नियासह। से विज्जाहरे कुवपत्तं पुरिसं पासइ। से विज्जाहरे इत्थी णं एवं वयासी-वल्लहा! एस कुवपुरिसे न निस्सरइ। महुबिंदुए विलुद्धा तेणं न निस्सरइ। इत्थी एवं वयासी-सामी! एस संकडे ठाणं गयंद साहा हल्लोलइ जाव मच्छी भक्खइ। एस दुहमज्झे सामी! किं महुबिंदुसुहं। एयं नियासह। ते वयणं सुच्चा जेणेव कुवपुरिसो तेणेव

---

**★ वरमेका कला रम्या ययाधःक्रियते भवः।**
**बह्वाभिरपि किं ताभिः कलङ्को यासु वर्तते ॥ १ ॥**

तस्माद्भो **प्रभव** ! अहं प्रभातसमय एतद्धनमन्तःपुर्यश्च त्यक्त्वा संयमं गृहीष्यामि। ततः **प्रभवो** वदति - भो **जम्बू** ! त्वयैतद्धनमेता नवयौवनाः सदृक्वयस्का यावत्सुरूपाः सुंदर्यो न विसृजनीयाः-, सादरं भोग्याः, एतत्प्रत्यक्षसुखं सत्यं कथं मुञ्चसि ? यददृष्टसुखलिप्सा मा कुरु। प्रत्यक्षनिर्वाणसुखं प्रियादर्शनं सरागेणापि यत्र निर्वाणमनुभूयते विरक्तचित्तः कथं भवसि। पुनरेतास्वादृतास्वादरं विशेषतः कार्यम्। अदूषितगुणगणालङ्कृतशरीराः स्त्रियस्तासां पुनः पुनरेतत्सुखं कथमासादयसि ? प्राप्स्यसि। मनुष्यभोगा दुर्लभाः, अहं तव सेवको भविष्यामीति। तथैतत्सुखं सम्प्राप्तं हस्तसात् तान् विलसय। यत उक्तम् -

**★ प्रियादर्शनमेवास्तु किमन्यैर्दर्शनान्तरैः।**
**प्राप्यते यत्र निर्वाणं सरागेणापि चेतसा ॥ १ ॥**

ततो **जम्बू प्रभवं** प्रत्येवमवादीत् - भो **प्रभव** ! एतत्सुखं कियन्मात्रम्, किं सुखमेतद्। अनेन जीवेन देवसुखान्यप्यनुभूतानि विविधाः कामभोगविलासा अनुभूताः। हे **प्रभव** ! एष जीवः सुखेषु तृप्तिं नो भजते। तृप्तिर्न जातेत्यर्थः। यतः-

कंठे विमाणं ठिच्चा विज्जाहर एवं वयासी – भो दुहिपुरिसा ! मम बाहं विलग्गह एस विमाणं चिट्ठह । तए णं सो पुरिसो एवं वयासी – एग खणं विलंबह एस महुबिंदुअं मुहं पडइ पच्छा उवागच्छिस्सामि । से बिंदुअं आसायइ । पुण विज्जाहरे दुच्चं पि तच्चं पि वारं वारं सद्दावेइ । स कुवपुरिसे खणं खणं विलंबावेइ । **पभवा!** तत्थ णं संकडं सुहडं पणट्ठइ वा न पणट्ठइ । **पभवो** एवं वयासी । तत्थ णं **जंबु** ! सुहडं किं वा कीवं तत्थ चिट्ठइ । एस को वि मूढे जेण तत्थ चिट्ठइ । **पभवा!** एवमेव संसारजीवे वियाणीया ।

संसारअडवी पुरिसजीव, गयंदमरणे, कुवजम्मावयारे, अजगरनरगे, सप्पचत्तारि कोहमाणमायालोभ, वट्टवल्ली आउयं, मूसा दो पक्ख सेय साम, मच्छीडंक आहि वाही, महुअबिंदुसरिसे विसयसुहं, विज्जाहर सुसाहुगुरु, विमाणं पवयणं

---

**★ धनेषु जीवितव्येषु स्त्रीषु चाहारकर्मसु ।**
**अतृप्ताः प्राणिनः सर्वे याता यास्यन्ति यान्ति च ॥ १ ॥**

तथा भो **प्रभव** ! अयं जीवो दुग्धरूपभोगानभिकाङ्क्षति । पुनर्जरामरणरूपं लकुटीं न पश्यति, यथा बिडालः पयः पश्यति परं यष्टिकां न पश्यति, तद्वदयं जीवः। तथा जीवो विषयभोगमीप्सति परं परलोके किम्पाकफलोपमं दुःखं न पश्यति । यथा मधुबिन्दुकलालसपुरुषवत् । ततः **प्रभव** एवमवादीत् – **जम्बु** ! स मधुबिन्दु-कलिप्सुः पुरुषः कः, मां त्वं निवेदय । ततो **जम्बू** तं प्रत्येवमवादीत् – भो **प्रभव** ! श्रुणु ।

कस्मिंश्चिद्ग्रामे कश्चित्पुरुषो महासत्वोपगतोऽन्यदा केनापि सार्थवाहेन सार्द्धमन्यजनपदे निर्गतः । प्रस्थितः सार्थेनान्यदा मार्गे चौरैः सार्थो लुण्टितः । तदा दिशोदिशं नेशुर्जनाः । स पुमानपि नष्टो मार्गभ्रष्टः पन्थानं न लभते । तस्मिन्प्रस्तावे मत्तमतङ्गजो वन्यकरी तं पुरुषहननार्थं सन्मुखमवपतितः । तं सन्मुखमुद्धतं धावमानं विलोक्य तदानीं स पुरुषः प्रणष्टः, विशेषतो भयभीतः सन्मार्गमध्ये याति । तावदग्र एकं महत्कूपं पश्यति । नीरविवर्जितं पश्यति । भयभीतः सनाकुलीभूतः स पुमान्

अत्थि। एरिसे जोए **पभवा !** कहं न निस्सरियइ वा निस्सरियइ। **पभवो** वयइ-निस्सरियइ। **जंबू** वयइ - तम्हाहं महुबिंदुसमाणं विसयसुहं चयइ संजमं विहरामि। **पभवा !** अहिंसासमं धम्मं नत्थि, संतोससमं सुहं नत्थि, सच्चसमं **सा उच्चं** नत्थि, सीलसमं मंडनं नत्थि। एस वयणं **पभवं** नो रुयइ। जहा उलूयं दिणं, जहा दिवं पयंगा, जहा तेण उज्जोयं, किविण दायारं, कुपुत्त अम्मापियवयणं, तहा **जंबू**वयणं न रुयइ। **( जंबूद्दिट्ठंते पढमोद्देसो सम्मत्तो )**

## बिइओ उद्देसो - कुबेरदत्ता दिट्ठंतो

पुणरवि **पभव** एवं वयासी। **जंबू !** अम्मापिया-बंधवा-कलत्त-मित्त-सयणसंबंधि-सपरिजणा जुव्वणारंभे मा मुंचह। **जंबू** एवं वयइ - **पभवा !** एस सव्वजणा आएसवत्थु कम्मजोए सव्व मिलिए। एस जीवे को वि कस्स नत्थि।

---

कूपान्तः प्रविष्टः प्राणरक्षणार्थम्। तस्मिन् कूपमध्य एको महान्वटवृक्षोऽस्ति। तत्छाखामधस्तर्नी न्यञ्चन् लम्बमानो विलग्नः। सोऽधः पश्यति कूपमध्यम्, तत एकं महान्तमजगरं विकसितमुखकुहरं पश्यति। स्फाटितमुखमित्यर्थः। पुनस्तस्मिन्नेव कूपे चतुर्षु कोणेषु चत्वारो महाविषधराः प्रचण्डशरीराः पन्नगास्तान् पश्यति। यदा च नर उपरितो विलोकयति तदानीं वटशाखामूलं द्वौ श्वेतश्याममूषकौ कृतन्तः पश्यति। तदानीं स गजो रोषयोगेन न्यग्रोधशाखाभञ्जनार्थं तां शाखामान्दोलयति हल्लोलयति। इतस्ततस्तस्यामेव प्लक्षशाखायां सरघालयं मधुपूर्णमस्ति। ततस्ता मधुमक्षिकास्तस्य पुरुषस्य शरीरं तीक्ष्णैऽङ्कैर्दशन्ति। रोम्णि रोम्णि श्लिष्यन्ति, विलग्नन्ति। तद्धस्तौ वटशाखाविलग्नौ शरीरान्मक्षिकानोड्डापयितुमुद्धर्तुं न शक्नोति। तस्मिन्समये मधुमक्षिकालयान्मधुबिन्दुकं गलति, क्षरति। तद्बिन्दुकं तस्य नरस्य मुखे निपतति। तज्जिह्वयाऽस्वादयति महत्सुखं वेदयते।

ततस्तस्मिन्नवसरे प्रभवः कोऽपि विद्याधरसभार्यो विमानस्थितो यात्रार्थं प्रस्थितः। आकाशे चलमाने ते विद्याधरविद्याधर्यौ कूपे तं पुरुषं महत्सङ्कटे निपतितं पश्यतः। सानुक्रोशा सानुकम्पा सदयहृदया विद्याधरभार्या प्रियं प्रत्येवमवादीत् - प्राणवल्लभ ! अत्रैव विमानं स्थापय। एतं कूपपुरुषं निष्कासय। ततो विद्याधरो

एक धम्म विणा अप्पहियं नत्थि। **पभवा !** ठाणे ठाणे भारिआ पुत्ता मित्ता बंधवा भवे भवे अत्थि। एग धम्म दुल्लहो। **पभवा !** एगभवे अठारसनायरे भविआ। **पभवं** वयइ – से अठारसनायरे दिट्ठंत मम वयह। तया णं **जंबू** एवं वयासी –

इहेव **जंबूद्दीवे** दीवे **भारहे** वासे **महुरा** नामं नयरी होत्था। तओ **महुराए कुबेरसेणा** णामं गणिआ परिवसइ। सरूवा, जुव्वणा, नविणा, चउसट्ठि महिला-गुणालंकिया, गोरंगी, परनरमणवेहणनयणसमत्था, परधणपच्चक्खगहणसमत्था। अण्णपुरिसे सद्धिं भुंजमाणे विहरइ। मायाकरंडगे तेण **कुबेरसेणाए** अण्णया जुअलं पसविआ। दसूट्ठणंतरिए से जुअले नामंकियमुद्दाए ते जुअलमलंकिआ तं जहा – **कुबेरदत्त, कुबेरदत्ता।** पट्टकुले परिवेड्डिया पेइमज्झे ठाविआ। सा मंजूसा **जमुणा** नदीपवाहे मुक्का। तेण मंजूसा अणुकमेणं जेणेव **सोरीपुरे** तडे तेणेव उवागच्छइ।

---

भार्ययैवमुक्तो तं पुरुषं पश्यति दृष्ट्वा च स्वस्त्रियं प्रत्येवं बभाण – हे वल्लभे ! एषः कूपपुरुषो न निस्सरिष्यति न निर्गमिष्यति। मधुबिन्दुस्वादविलुब्धस्तेन कारणेन न निष्क्रमिष्यति। ततः स्त्रीत्थमवादीत् – स्वामिन् ! एतन्महत्सङ्कटस्थानमन्यच्च गजेन्द्रेण शाखा दोलिता, यावन्मक्षिका भक्षयन्ति शरीरम्, एतद् दुःखमध्ये स्वामिन् स्तोकं बिन्दुस्वादसुखं न त्यक्षति किम्। महद्दुःखमनुभूयतेऽनेन। तस्मात्त्वमेनं निष्कासय मद्वचसा। ततो विद्याधरो दयां दत्वा यत्रैव कूपपुरुषस्तस्योपकण्ठे विमानमवतारयति। अवतीर्य च स्थापयति। ततः कूपकण्ठे स्थित्वा विद्याधरोऽवादीत् तम् – भो दुःखीन् पुरुष ! मम बाहुविलग्नो भव। त्वां यथा निष्कासयामि मदेतद्विमाने तिष्ठ। ततः स पुमान्नेवमवादीत् – भो परोपकारिन् ! महाभागकं क्षणं विलम्बं कुरु। प्रतीक्षस्व एतन्मधुबिन्दुकं मुखे यावन्निपतति। मदीयैतदेकबिन्दुपतनानन्तर-महमुपागमिष्यामि। इत्थमुक्त्वा तद्बिन्दुकमास्वादयति। पुनरपि विद्याधर एवम-वादीत्। द्वित्रिर्वारं शब्दापयति कूपपुरुषम्। पुनः स वक्ति – क्षणं प्रतीक्षस्व तं विलम्बयति। किं बहुना स्वादलुब्धो न निर्गमितः। विद्याधरः स्वस्थाने गतः।

ततो **जम्बुस्वामिनोक्तम्**। भो **प्रभव** ! तत्र सङ्कटे सुभटः कश्चित्प्रणश्यति

तए णं **सोरीपुर**वासी दो ववहारिया। तेणं सा मंजूसा गहिआ। एगंते विहाडेइ। जेणे गिहे पुत्तं अत्थि पुण पुत्ती नत्थि तेण ववहारिणा पुत्ती गहिआ। जेणे गिहे पुत्ती पुण पुत्तं नत्थि तेण ववहारिणा पुत्तं गहिअं। पुव्वनाममुद्दालंकिआ तस्स नामेण विवड्ढइ। कमेण जुव्वणालंकिआ सरिसया से दुवे अण्णोण्णं पाणि गिण्हाविया। सुहंसुहेण विलासमाणे अण्णया पइ पिया सारिं-पासे कीलमाणे अण्णोण्णं मुद्दिआ पासइ नियनामअलंकिया। तया णं ते दुवे संकिआ, कंपिआ अन्नोन्नं अम्मापिय पुच्छा **जमुणा** मंजूसा लद्धा सव्वं निवेइयं। अन्नोन्नं भायभइणी विआणिआ।

**कुबेरदत्ता** अइववेरग्गं पत्ता पव्वइआ। बहु छट्ठट्ठमदसमदुवालसतवं आराहेइ। अण्णया सुक्कज्झाणे झाएड्हा जीवे महापावकम्मकारी बंधवा भयणी

---

न वा प्रणश्यति। एवमुक्ते **प्रभव** एवमवादीत् - तत्र **जम्बु** ! सुभटः, ऊर्जस्वी सर्वशिल्पकुशलो युवा स तत्र न तिष्ठति। ईदृशः को मूढो यस्तत्र तिष्ठति। ततो **जम्बु** प्रोवाच - भो **प्रभव** ! एतदेव संसारस्वरूपं विजानीहि। असारसंसाररूपाटव्यां पुरुषो जीवः, गजेन्द्ररूपं मरणम्, कूपं जन्मावताररूपम्, अजगरो जरारूपम्, चत्वारः सर्पाः क्रोधमानमायालोभरूपाः, वटशाखारूपमायुः, द्वौ पक्षौ मूषकरूपौ श्वेतश्यामौ, मधुमक्षिका आधिव्याधिरूपाः, मधुबिन्दुसदृशं विषयसुखम्, तत्र विद्याधररूपः सुसाधुः, प्रवचनरूपं गुरुवचनं विमानम्, ततः **प्रभव** ! ईदृक्षेऽर्थयोगे कथं निस्सरति वा न निस्सरति। **प्रभवो** वदति - यो विचक्षणः शूरः स निस्सरति। **जम्बु** वदति - तस्मादहं मधुबिन्दुसमानं विषयसुखं तत्र विद्याधररूपो सुसाधुस्तत्संयोगे विषयसुखं बिन्दुसमानं त्यक्त्वा संयमे विचरिष्यामि। भो **प्रभव** ! अहिंसा समो धर्मो नास्ति, सन्तोषसमं सुखं नास्ति, सत्यसमं शौचं नास्ति, शीलसमं मण्डनं नास्ति। एतत्सर्वं वचः **प्रभवं** प्रति न रोचते। यथाऽलवणमोदनम्, यथा दीपस्य पतङ्गाः, यथा स्तेनस्य ज्योत्स्ना, कृपणस्य दातारः, यथा कुपुत्रस्य मातृपितृवचनं तथा **जम्बू**वचनं न रोचते **प्रभवस्य**। **( जम्बूदृष्टान्ते प्रथमोद्देशकः समाप्तः )**

पुनरपि **प्रभव** एवमवादीत् **जम्बूकुमारं** प्रति - भो **जम्बु** ! मातापिता-

विलसिआ। एस पावं किहं वुच्छिंदिस्सइ। एवं सुक्कलेसाए ओहिनाणे समुप्पण्णं। ते णाणजोए बंधवचरिअं विलोयइ। तं जहा – स **कुबेरदत्ते** ववहारट्ठाए **महुराए** पत्तो। कम्मजोए विसयवियारवसिए **कुबेरसेणा** वेसा सरूवा दिट्ठा मोहं गया। **ते कुबेरदत्त कुबेरसेणा** सद्धिं विलासमाणे एगपुत्तं पयाया दिट्ठा। **कुबेरदत्ता** साहुणी सीसं धुणइ। हा धी विसय जेण जीवे कज्जं अकज्जं न वेयइ। एस जीवे, धणे, आउयइत्थिविसए ववहाररासी जहिं ही तिप्पति नत्थि। **कुबेरदत्त** अयाणमाणे मायसद्धिं भोगं भुंजइ पुत्त पसविया। अहं पडिबोहट्ठाए तत्थ गच्छामि। एवं आभोए गुरुआणाए साहुणी **महुराए** आगया। जेणेव **कुबेरसेणा** गेहे तेणेव

---

बान्धवकलत्रमित्रस्वजनपरिजनसम्बन्धिज्ञातिवर्गसुखं मा मुञ्च न विसृज। **जम्बू** एवमभाषिष्ट – भो **प्रभव**! एते सर्वजना आत्मीयस्वार्थकर्मयोगेन मिलिताः सन्ति। संसारेऽस्मिन्नसारे जीवः कोऽपि कस्यापि नास्त्येकं पुण्यं विनाऽत्महितमन्यन्नास्ति। भो **प्रभव**! स्थाने स्थाने भार्यापुत्रबन्धवा भवे भवे स्वकीयकर्मयोगेन मिलिता भिन्नभिन्नगतिभ्य उद्धृता एकीभूताः सङ्गताः। भो **प्रभव**! एषो धर्मो दुर्लभः, स्वजनसङ्गमः सुलभः। भो **प्रभव**! एकस्मिन् भवे ऽष्टादशनातरका अभुवन्। **प्रभवो** वक्ति – भो **जम्बू**! ममाष्टादशगोत्रदृष्टान्तं वद। ततो **जम्बू** तं प्रत्येवमवादीत्– भो! श्रुणु।

इहैव **जम्बूद्वीपे भारते वर्षे मथुरा** नाम्नी नगर्यभूत्। तस्यां **मथुरायां कुबेरसेना** नामा गणिका परिवसति। सुरूपा, सयौवना, चतुःषष्टिललनाविज्ञानगुण-गणालङ्कृता, गौराङ्गी, परनरविप्रतारणपरा, नयनबाणवेधनसमर्था, परधनप्रत्यक्ष-वञ्चिका ग्रहणसमर्था। अन्यदा केनचित्पुरुषेण सार्धं सुखान्युपभुञ्जाना विचरति मायामिथ्याकरण्डिका। ततः **कुबेरसेनया**ऽन्यदा पुत्रपुत्रीलक्षणं युगलं प्रसूतम्। दशदिनानन्तरं तद्युगलं नामाङ्कितमुद्रिकाङ्कितं कृत्वा **कुबेरसेनया** पट्टकूले परिवेष्ट्य पेटिकायामन्तरा संस्थाप्य मञ्जूषा **यमुनासरित्प्रवाहे** मुक्ता।

ततः सा मञ्जूषाऽनुक्रमेण **शौरीपुरसमीपे** प्राप्ता। तत्र **शौरीपुरवास्तव्यौ**

उवागच्छइ उवागच्छित्ता वेसं **कुबेरसेणं** साहुणी एवं वयासी – **कुबेरसेणा !** मम ! उवस्सयं दावेह । तया णं वेसा वयइ–एस सालाए चिट्ठह तया णं एस मम पोयं रोवइ तया णं एस पालणं हल्लोलेह । तया णं ते साहुणी तत्थ ठिया । ते सालामज्झे गब्भघरए **कुबेरसेणाए** सद्धिं **कुबेरदत्त** विविहं कामं वियरइ ।

तेणं समएणं पालणं पोय रोयइ । मज्झत्थि वेसा वयइ–साहुणी ! पोअ पंजरं हल्लोलेह । तया णं ते साहुणी महुरवयणेण हालरुअं गाएइ । तं जहा– बालग ! मा रोयह तुमं मम एग माया बंधव मा रोयह ।१। मम वल्लह **कुबेरदत्त** तस्स पुत्त

---

द्वौ व्यवहारिकौ परमवयस्यौ स्वेच्छया धुनीतटनिकटे सोल्लासं क्रीडां कुर्वन्तौ तत्रैव समुपस्थितौ । ताभ्यां सा मञ्जूषा **यमुना** प्रवाहतो निष्कास्य गृहीता । रहसि तामुद्घाट्य तस्थौ । ताभ्यां परस्परमेषः पणकृतो यत्किञ्चिदस्यां मध्ये निर्गमिष्यति तद्विभागं कृत्वा वां गृहीष्यावः । ततो निर्गतं तद्युगलं यस्य गृहे पुत्रोऽस्ति तेन सुता गृहीता । ततः पूर्वनामाङ्कितमुद्रिकां दृष्ट्वा मातृपितृभ्यां तयोस्तन्नामैव रक्षितम् । क्रमेण यौवनमधिगतौ सश्रीकौ, गुणालङ्कृतौ, सुरूपौ, सलावण्यौ तौ द्वावन्योन्यमनुक्रमेण पूर्वकर्मसंयोगतः परिणीतौ । शुभलग्ने मातृपितृभ्यां परिणायितौ । सुखंसुखेन भोगान् विलसन्तौ विचरतः । अन्यदा पतिपत्न्यौ सारिक्रीडां क्रीडन्तौ दिव्यन्तावन्योन्यं मुद्रिकां पश्यतः । निजनिजनामाङ्कितमुद्रिकां विलोकयन्तौ शङ्कितौ, काङ्क्षितौ । ततस्तौ द्वावन्योन्यं मातापित्रोर्निदानं पप्रच्छतुः । मातृपितृभ्यां सर्वं वृत्तान्तं ताभ्यां प्ररूपितम् । यथा मञ्जूषायां लब्धौ तथाऽऽमूलचूलतो निवेदितम् । ततोऽन्योन्यं भ्रातृभगिन्यौ विज्ञाय **कुबेरदत्ता**ऽतीववैराग्यमनुप्राप्ता साध्वीपार्श्वे प्रव्रजिता । बहूनि षष्ठाष्टमदशमद्वादशादिना नानाविधतपांसि तप्यमाना विचरति । ज्ञानमाराधयति । अन्यदा प्रस्तावे शुक्लध्यानं ध्यायन्तीत्थं वितर्कयन्त्यासीत् । हा जीव ! पापिन् महाकिल्बिषकारिन् त्वं तेभ्यः पातकेभ्यः कथं मुच्यसे ? यतो भ्राताभगिनीं विलसत इति दुष्टकर्मविपाकं परत्रमहाकटुकफलं नरकनिगोदादिगतिषु ईहाञ्चक्रे । एवं शुक्लध्यानपादसंस्पर्शनादवधिज्ञानं समुत्पन्नम् । सा तेन ज्ञानेनाभोगयति,

तुमं तेणं मम पुत्त, मा रोयह ।२। मम पाणवल्लह **कुबेरदत्त** तस्स तुमं बंधव तेण मम तुमं देउर, मा रोयह ।३। मम बंधवस्स तुमं पुतं तेण तुमे मम भत्तीज, मा रोयह ।४। मम मायापति तस्स तुमं बंधव तेणं तुमं मम पित्तिय, मा रोयह ।५। मम सवक्क पुत्तस्स तुमं पुत्तं तेण तुमं मम पउत्त, मा रोयह ।६। ए छ नायरे साहुणी पोअ सद्धि भासियाइ । तओ पच्छा साहुणी छ नायरे बंधव **कुबेरदत्त** सद्धि भासइ। तं जहा – भो **कुबेरदत्त !** सुणेह – तुमं मम एगमाया तेणं तुमं मम बंधव सुणेह ।१।

---

विलोकयति । भ्रातृचरित्रं द्योतयति ।

ततः स **कुबेरदत्तः** व्यवहारार्थं **मथुरां** प्राप्तः । कर्मवशतस्तत्रैव पुरि विषयविकारव्यापारवशंगतः । **कुबेरसेना**वेश्यां सुरूपां दृष्ट्वा तया जनयित्र्या सह कन्दर्पसर्पो दृष्टो मोहंगतः । अज्ञानकर्मोदयबाहुल्यात् तं तथाविधं महामोहग्रस्तं **कुबेरदत्तं कुबेरसेना**सार्धं विलसन्तं ततश्च तमेवैकपुत्रप्रजातं विज्ञाय दृष्ट्वा च **कुबेरदत्ता** साध्वी तच्चरित्रं शीर्षं धूनयति । संसारासारतां विचार्येत्थं वक्ति – हा धिग् विषयकर्मणो मोहकर्मणो येनाऽयं जीवः कार्याकार्यं न वेत्ति, यतो जीवो धनायुःस्त्रीषु न कदापि तृप्त इति । विषयवशतो भ्रातरं मदनानलज्वालाकुलकलितं दृष्ट्वा साध्वी वक्ति – **कुबेरदत्तो**ऽयं मातरमजानानो मातुः सार्धं भोगान् भुनक्ति । ततः सुतः सवित्र्या सह लुब्धः । अऽतोऽहं प्रतिबोधार्थं तत्र व्रजामि । मनसैवं **कुबेरदत्ता** साध्वी विचिन्तयति । तत इत्थं विचिन्त्य गुरुण्यभ्यनुज्ञाता प्रदत्तादेशा ततो विजहार । क्रमानुक्रमेण **मथुराया**माजगाम ततो यत्र **कुबेरसेना**वाराङ्गनागृहं तत्रैवोपागात् । उपागत्य च **कुबेरसेनां** पण्याङ्गनामेवं वदति – **कुबेरसेने** ! मामुपाश्रयं दापयत । तदा वेश्या वदति – शालैषा सुन्दरा तत्र निवासं कुरु । तत्र तिष्ठ । तदा साध्व्या विचारितम् – एषोपशमरसमयी येनानयोपशमरसमयं वाक्यं प्रयुक्तमिति कृत्वा सा वेश्यायाः सुलभबोधित्वं विज्ञातम् । साध्व्या विज्ञाय च तत्रैव तद्वसत्यां चानुज्ञाता समुपस्थिता तत्र शालायामुषिता । तस्यां शालायां मध्यगृहे **कुबेरसेना**सार्धं

मम अम्मा तस्स तुमं पइ तेणं तुमं मम पिया सुणेह ।२। मम पिया तस्स तुमं पिया तेणं तुमं मम विद्धपिया सुणेह ।३। तुमं मम पाणि गिण्हइ तेणं तुमं मम वल्लह सुणेह ।४। मम सवक्क तस्स तुमं पुत्तं तेणं तुमं मम पुत्त सुणेह ।५। मम देउरं तस्स पिया तेणं तुमं मम ससरा सुणेह ।६। ए छ नायरे साहुणी **कुबेरदत्त** पयं भासियाइं ।

तओ पच्छा अम्मा **कुबेरसेणा** पयं छ नायरे साहुणी भासइ । तं जहा- अम्मा **कुबेरसेणा !** सुणेह - तुमे अहं पसविआ तेणं तुमं मम अम्मा सुणेह ।१। पिआ वि पिआ तस्स तुमं इत्थी तेणं मम विद्धमाया सुणेह ।२। मम बंधव तुमं

---

**कुबेरदत्तो** विविधकाम-भोगानुपभुञ्जानो विचरति । महदव्यवहारमयोग्यकार्य-माचरतीत्यर्थः ।

तस्मिन् समये पोतदोलापञ्जरके पोतो रोदति । तदा मध्यस्थगृहगता **कुबेरसेना** साध्वीं प्रति वक्ति - साध्वी पोतपञ्जरं दोलय हल्लोलयेत् । ततस्तदानीं तयेत्युक्ते सा साध्वी मधुरवचनेनोल्लापनकं गायति तां विजिज्ञापयितुम्, तद्यथा - बालक ! मा रोद तव ममैका माता अतो भ्रातर्मा रोद १ । मम वल्लभः **कुबेरदत्तः** तस्य त्वं सुतोऽतो पुत्र मा रोद २ । मत्प्राणप्रिय **कुबेरदत्तस्तस्य** त्वं भ्राता तेन त्वं मम देवरो मा रोद ३ । मद्भ्रातृपुत्रत्वेन त्वं भ्रातृजो मा रोद ४ । मन्मातृपतिः **कुबेरदत्त**स्तस्य त्वं भ्राताऽतो पितानुजः पितृव्यः श्रृणु ५ । मम सपत्नी तस्य पुत्रस्यत्वं पुत्रस्तत स्तेन त्वं पौत्र मा रोद ६ । एते षट् नातरकाः साध्व्या पोतेन साद्र्धं भाषिताः ।

ततः साध्वी षट् नातरका भ्रातृ**कुबेरदत्तेन** सार्धं भाषयति - तद्यथा-भो **कुबेरदत्त !** श्रुणु । तव ममैका माता तेन त्वं भ्रातर्श्रुणु १ । मम मातृपतित्वात् हे पितस्त्वं श्रुणु २ । मत्पितास्तस्य त्वं पिता ततो मम पितामह त्वं श्रुणु ३ । त्वं मत्पाणिगृहीता ततस्त्वं मद्वल्लभ श्रुणु ४ । मत्सपत्नी तस्य त्वं पुत्रस्ततः सपत्नीपुत्रत्वेन पुत्रः श्रुणु ५ । मद्देवरस्तस्य त्वं पिताऽतो मम श्वसुर श्रुणु ६ । एते षड् नातरकाः साध्व्या **कुबेरदत्तं** प्रति भाषिताः ।

भारिआ तेणं तुमं मम भोजाइ सुणेह ।३। सवक्कपुत्तस्स तुमं कलत्त तेणं तुमं मम वहुअं सुणेह ।४। मम भरतारस्स तुमे माया तुमं मम सासु सुणेह ।५। मम भरतार तस्स तुमं भारिया तेणं मम तुमं सवक्कि सुणेह ।६। ए छ नायरे साहुणी **कुबेरसेणा** पइ भासिता ।

एवं अट्ठारस नायरे गब्भघरमज्झे **कुबेरसेणाए** सुच्चा **आसुरत्ते** सालं उवागए। एवं वयासी – साहुणी ! एस असमंजसवयणं असच्चं केणट्ठेणं वयइ ।

---

ततो मात्रा सार्द्धं **कुबेरसेनया** सह षड्गोत्रा भाषयति – तद्यथा मातः **कुबेरसेने** ! श्रुणु तथा मां त्वं प्रसूता तवात्मजाऽहं ततस्त्वं मम माता श्रुणु १ । मत्पिता **कुबेरदत्त**स्तस्य माता त्वं तेन पितामही श्रुणु २ । मद्भ्रातृभार्यात्वेन मम भ्रातृजाया श्रुणु ३ । मत्सपत्नीपुत्रस्य त्वं जाया तेन.मद्वधू श्रुणु ४ । मद्भर्तुस्त्वं माता ततो मम श्वश्रू श्रुणु ५ । मद्भर्तुस्त्वं भार्या तेन मत्सपत्नी श्रुणु ६ । एते षट्नातरकाः साध्व्या मातरं **कुबेरसेनां** प्रति भाषिताः । एवं सर्वमीलनेऽष्टादशगोत्रा नातरकाः सञ्जाताः । ततो गर्भगृहगता **कुबेरसेना** श्रुणोति । तान् श्रुत्वाऽऽसुरत्वं चण्डत्वभाव-मुपस्थिता । साध्वीनिकटमुपागता एवमवादीत् – साध्वि ! महाव्रतधारिणि ! त्वमेतद-समञ्जसवचनमसत्यं केनार्थेन वदसि ? एषः किं साध्वीधर्मो ? यतः साधवोऽशुभम-युक्तमश्रुतं न भणन्ति । एषः साधुधर्मः, त्वयाऽश्रुतपूर्वं वाक्यं कथमवाचि ? तयेत्युक्ते साध्वी मितमञ्जुलमधुरवाण्या तां प्रत्येवमवादीत् – **कुबेरसेने !** श्रुणु । साध्व्योऽलीक-मसमञ्जसवाक्यं न वदन्ति । पुनरपि **कुबेरसेना** विनयेन साध्वीमेवं परिपृच्छति – साध्वी ! सत्यं वद । ततः साध्व्या पश्चात्सर्वमामूलचूलतः सर्वं सत्यं स्वानुभूतं निवेदितं यथाजातम् । ततः **कुबेरदत्तया** मञ्जूषादिवृत्तान्तं प्रकाशितम् । तत्श्रुत्वा **कुबेरसेना**ऽतीवपश्चात्तापं विदधति । बहुवैराग्यभावेन संवेगमुपागता संयमं गृण्हाति। तत उग्रतपसा कर्मनिर्बलं कृत्वाऽनशनेन मृत्वा देवलोकं प्राप्ता । **कुबेरदत्ता** साध्व्यपि चारित्रं सम्यक् प्रपाल्यान्तेऽनशनाराधनादिसमाधिमरणेन मृत्वाऽनुक्रमेण सद्गतिं गता ।

एस किं साहुणीधम्मे । साहुणी हास, असुहं अजुत्तं सविअजुत्तं न भणंति । एस साहुधम्मे । तया णं सभासाए साहुणी एवं वयइ – **कुबेरसेणा** ! साहुणी असच्चं न वयइ । पुणरवि **कुबेरसेणा** विणएणं पुच्छइ । पच्छा साहुणीए सव्वं निवेइयं । **कुबेरसेणा** तुमं **कुबेरदत्तकुबेरदत्ता**मंजुसाइवुत्तंतं सुच्चा अइव पच्छाहावं वेयइ। बहु वेरग्गभावसंजमेणं गिण्हइ । उग्गं तवं कम्म निब्बलं किच्चा देवलोए पत्ता । **पभवा !** संसार एस लक्खणे । एस सव्वकुडुंबं एवं भाणियव्वं । कुडुंब एस मायाजालं एस को वि मोहं कीरइ । जे कीवाणं कायराणं इहलोए पिवासी परलोयपरमुहाणं ते जीवे संसारसुहं वेयइ । जिणवयणं एवं तं जाणइ । जाई जोणिगाम-गोयनयरठामनामकुलं नत्थि जीवे न फासियं तम्हा एग धम्ममग्ग सरणं करिस्सइ ।

**( जंबू दिट्ठंते बीओ उद्देसो समत्तो )**

---

ततो **जम्बू** वक्ति – भो **प्रभव** ! एष संसार ईदृग्लक्षणः । एतत् कुटुम्बं मायाजालसमानं स्वप्नोपममवगम्यैतस्मिन्महामोहः कथं क्रियते । ये कातरा इहलोक सुखप्रसक्तचित्ता विषयपिपासया परलोकसाधनपराङ्मुखास्ते जीवाः संसारसुखं वेदयन्ते । तथाहि– भो **प्रभव !** संसारेऽपारे तत्स्थानं नास्ति यज्जीवेन पर्याप्तापर्याप्त-सूक्ष्मबादरत्रसस्थावरत्वेन चतुर्दशरज्वात्मको लोको न स्पृष्टोऽभवदनेन प्राणिना । यत उक्तम् –

**★ तत्स्थानं नास्ति लोकेऽस्मिन् वालाग्रभागमानतः ।**
**यज्जीवैः कर्मयोगेन न च स्पृष्टं कदापि चेत् ॥१ ॥**

**प्रभव** ! तानि जनपदजातियोनिग्रामनगरस्थाननामकुलगोत्राणि न सन्ति यज्जीवेनाऽसंस्पृष्टानि । तस्मादीदृशं स्वरूपं विज्ञाय धर्मः शरणत्वेन क्रियते । मनसि धार्यते सर्वदुःखापहः श्रीजिनोक्तः । **( इति श्रीजम्बूदृष्टान्ते द्वितीयोद्देशकः )**

पुनरपि **प्रभवो जम्बू**मेवमवादीत् – **जम्बू** ! एतस्मिन्संसारे सुन्दर्यो नवयौवना, पद्मलोचना, शशाङ्कवदनास्त्रियः तासां सङ्गमं समधिगम्य ये ताभिः साद्‌र्धं न श्लिषन्ति सुरतसुखमनुभवन्ति (च) तेषां मनुष्यजन्मप्राप्तमपि निरर्थकं

# तईओ उद्देसो – महेसरदत्तदिट्ठंतो

पुणरवि **पभव** एवं वयासी – **जंबु** ! एस संसारे सुंदरी नवजुव्वणा सद्धिं न आलिंगइ तस्स जम्म निरत्थयं वियाणह। पुण तव गिहे पुत्तं विणा एरिसि रिद्धिं कहं पाविस्सइ। **जंबु !** जहा – **पुराणे** एरिसं वयणं अत्थि। तं गिहं सुण्णं पुत्तविणा, बंधवं विणा दिसि सुण्णा, सत्थं विणा सुहडसुण्णं, दरिद्देण सव्वं सुण्णं। तेणं तव भारियाए एगं पुत्तं भवइ। पच्छा तस्स पुत्तस्स गिहभारं ठवेइ पच्छा संजमेण विहर। पुण **पुराणे** पुरिसं वयणं अत्थि। पुत्तं विणा गइ नत्थि सग्गसुहं नत्थि, तम्हा पुत्तमुहं दिट्ठा पच्छा ते माणवा सग्गं पावइ। तम्हा **जंबु !** गिहं चिट्ठह। तया णं **जंबू** वयइ– **पभवा !** पुत्तोवरि मित्ति मा धरेह। पसु बहवा पसवइ। तओ णं किं पसु सग्गं

---

विफलं जानीहि। पुनस्तव वेश्मनि पुत्रं विनैषा श्रीः कुत्रापि कस्यचिदन्यस्य हस्ते समेष्यति कुलटाङ्गनावदन्यत्र त्वल्लक्ष्मीः। **जम्बु ! पुराणे**ऽपीदृशं वचनं प्रोक्तमस्ति– पुत्रं विना तद्गृहं शून्यम्, बान्धवैर्विना दिग्शून्या, प्रहरणं विना शून्यं सैन्यम्, राज्यं शून्यं निःसचिवम्, सरः शून्यं जलं विना, मुखं नेत्रं विना शून्यम्, भोज्यमाज्यं विना शून्यम्, दयिता दुःशीला तस्यापि गृहं शून्यम्, सैन्यं स्वामि विना शून्यम्, देवं विना प्रासादः शून्यः, तथा दरिद्रेण सर्वं शून्यम्। ततस्तव पत्न्योऽङ्गजं यावज्जनयन्ति तावत्कालं प्रतीक्षस्व। तत एकस्मिन् सुते जाते पश्चात्सुतं स्वगृहभारे विनिवेश्य त्वं संयमे विचर। पश्चात्संयममार्गमनुष्ठियते त्वया। **पुराणे**ष्वीदृशं वचनमस्ति –

**विना पुत्रं गतिर्नास्ति स्वर्गसुखं सर्वथा नास्ति तस्मात्पुत्रमुखं दृष्ट्वा**
**पश्चाद्देवाशनं प्राप्नुवन्ति मनुष्याः।**

तस्मान्मद्वचसा **जम्बु** ! गृहे तिष्ठ। तदानीं **जम्बूः प्रभवं** प्रत्येवं वदति – भो **प्रभव** ! पुत्रोपरि स्नेहभावं न ध्रियते। मैत्रीभावमपि मा धर। **प्रभव !** पशवो बहवो प्रसवन्ति पुत्रान् ततः स्वर्गं किं प्राप्स्यन्ति। ततः **प्रभव** एवमवादीत् – **जम्बु**! पुत्रं विना पितुः परलोकगतस्य वारि को दास्यति। **जम्बू** वक्ति – **प्रभव !** कोऽपि कस्यापि पानीयं न दास्यति। सर्वे जीवा निजनिजकर्मवशतः संसारे परिभ्रमन्ति।

पाविस्सइ। **पभव** एवं वयासी – **जंबु** ! पुत्त विणा पिअरं वारि को वि दाविस्सइ। **जंबु** वयइ – **पभवा** ! कोवि कस्सइ पाणी दाविस्सइ। सव्व जीवे निय निय कम्मप्पसाए संसारे परिफुरइ। **पभवा** ! तेण को वि पिआ को वि पुत्ता जहा **महेसरदत्ते**। **पभव** वयइ – ते **महेसरदत्त** दिट्ठंत मम उवदिसेह। **जंबू** वयइ –

**पभवा** ! इहेव **जंबूद्दीवे** द्दीवे **भारहे** वासे **विजयपुरे** नयरे **महेसरदत्त** ववहारी एगे वसइ। जिणधम्मं न याणइ। भद्दपरिणामे विहरइ। अण्णया **महेसरदत्तपिया** मरणट्ठाए भूमिसंथरिया पुत्तेणं एवं वयासी – पुत्त ! अप्पकुले सराह (श्राद्ध) समए एगं महिसं घाइज्जइ। तुमं मम दिणे महिसं संभारे कज्जं करेह। पुत्तं तहत्ति पडिवन्नं। तओ पच्छा स पिया अट्टज्झाणे कालं किच्चा महिसे पाउब्भूओ। **महेसरदत्तमाया** मंदिरमोहे कालं किच्चा साणी पुणा वियरइ।

---

चतुर्गतिषु परिस्फुरन्ति। **प्रभव** ! तेन न कोऽपि कस्य पिता, न कोऽपि सुतः, यथा **महेश्वरदत्त**व्यावहारिकः। **प्रभवो** वक्ति – **जम्बु** ! **महेश्वरदत्त**दृष्टान्तं ममोपदिशत। **जम्बू** वक्ति – **प्रभव** ! श्रुणु।

इहैव **जम्बूद्वीपे** **भारते** वर्षे **विजयपुर**नगरे **महेश्वरदत्तो** व्यावहारिकः परिवसति। परममिथ्यात्वमोहितमतिः। जिनधर्मलवलेशमात्रं न जानाति परं भद्रकपरिणामो विचरति। अन्यदा **महेश्वरदत्तश्रेष्ठीपिता**मरणार्थं भूमौ संस्तारितः पुत्रं प्रत्येवमवादीत् – भो पुत्र ! आत्मीयकुले ईदृशी कुलक्रमायाता परम्परागता स्थितिरस्ति। श्राद्धसमय एको महिषो व्यापाद्यते स्वजनवर्गं पोषणार्थम्। ततस्त्वयापि मम प्रदेयः। **महेश्वरं** पुत्रं संस्मारयति पिता ततस्तेन तथेति प्रतिपन्नम्। ततः पश्चात्स पिताऽऽर्तध्यानेन कालं कृत्वा महिषत्वेन तत्रैव प्रादुर्भूतः। **महेश्वरदत्तमाता** तस्यैव मन्दिरान्तरा कालं कृत्वा शुनीत्वेन समुत्पन्ना विचरति गृहमध्य इतस्ततः। स **महेश्वरदत्तो**ऽन्यदा कदाचिन्निजस्त्रियमन्यपुरुषेण सार्द्धं विलसन्तीं क्रीडन्तीं पश्यति। तदानीमेवमभ्यर्थितं चिन्तितम् – हा स्त्रीविश्वासं कश्चिन्मनुते यो मनुते स मूढपुरुषः। विडम्बनमेतत् तद्यथा – स्त्रियो वक्त्रवचने चन्द्रवदनवच्छीतले, वाणी मधुसदृशा

तया णं **महेसरदत्त** अण्णया कयाइ नियभारिआ अण्णपुरिससारिसया विलासमाणी पासइ। तया णं एवं अब्भत्थिए – हा! "इत्थिविसासं मण्णयइ। से मूढपुरिसे"–विद्धवयणं एस सच्चं। तं जहा – वयणं वाणी महुरगविलमणे निग्घाय दिट्ठी, सुकुमाल अण्णपुरिसं विलसइ। अण्णपुरिसं चिंतणं तेण इत्थीविसासं मूढलक्खणं। जहा **पएसी सूरीकंता** इव भाणियव्वा। इत्थी णं सहावे सत्तदोसा पन्नत्ता। तं जहा – अतहं१ साहसं२ माया३ मूढत्तं४ अइलोहं५ असुअं६ अहिंसाहीणं७ एस सत्तदोसा तेण इत्थी न वीसासं। एवं अब्भत्थिमाणे रोसवसे अण्णपुरिसं घायइ।

---

मिष्टा, कृष्णा मनसि स्त्रियः पापचरित्रकारिण्यः, निर्घृणा देहे सुकुमालिन्यः कर्मतः कठोराः। यतः –

**★ आलिङ्गत्यन्यमन्यं रमयति वचसा वीक्ष्यते चान्यमन्यम्।**
**रोदत्यन्यस्य हेतोः कलयति शपथैरन्यमन्यं वृणीते।**
**शेते चान्येन सार्द्धं शयनमुपगता चिन्तयत्यन्यमन्यम्।**
**स्त्री वामेयं प्रसिद्धा जगति बहुमता केन दृष्टेन सृष्टाम्॥ १ ॥**

इति हार्दम्। यदन्यपुरुषेण विलसन्त्यन्यं मनसि विचिन्तयन्त्यन्यं निर्भर्त्सयन्त्यन्यं विडम्बयन्ति। यतः –

**★ सम्मोहयन्ति मदयन्ति विडम्बयन्ति निर्भर्त्सयन्ति रमयन्ति विषादयन्ति।**
**एताः प्रविश्य सदयं हृदयं नराणां किं नाम वामनयना न समाचरन्ति॥ १॥**

अतः स्त्रीविश्वासं मूर्खलक्षणम्। यथा **प्रदेशीसूरीकान्तेव** स्त्रीचरित्राणि बोद्धव्यानि।

स्त्रीस्वभावे सप्तदोषाः प्रज्ञप्तास्तद्यथा – अनृतम्, साहसम्, माया, मूर्खत्वम्, अतिलोभता, अशौचम्, निर्दयत्वं, च स्त्रीणां दोषाः स्वभावजाः १। तेनार्थेन स्त्रीणां विश्वासो न कर्तुं योग्यः, एवं विचिन्तयन् रोषवशतोऽन्यं पुरुषं हन्ति। सोऽन्यपुरुषः स्वात्मदोषं स्वल्पं विजानन्नात्मानं निन्दन् कालं कृत्वा तस्यैव गृहे तत्स्त्रीकुक्षौ स्ववीर्यमध्ये गर्भत्वेन समुत्पन्नः। स जारनरो नवसु मासेषु व्यतिक्रान्तेषु यावद्दारकं

ते अण्णपुरिसे अप्पदोसं वियाणमाणे अप्पनिंदमाणे कालं किच्चा **महेसरदत्त**इत्थिकुच्छे विरीयमज्झे पुत्त समुप्पन्नो। से पुत्ते नवण्णं मासाणं जाव पुत्तं पयाया। अइव **महेसरदत्तस्स** ते पुत्त वल्लहो। अहनिसि उच्छंगे निवेसावेइ। **महेसरदत्ते** स पुरिसघायं को वि न याणेइ। मम्मए पच्छन्नं ठिया। एस पंडियलक्खणा पन्नत्ता तं जहा–अट्ठं पणट्ठं, मणकट्ठं, गिहदुचरियं, सयणवंचणं, पूअणअवमाणं एअं च मम्म पंडिया न पयासेइ।

तए णं **महेसरदत्ते** स पुरिसघाए तुसणीए सुहंसुहेण विहरइ। तए णं से **महेसरदत्तभारिया** पइ उवरि विसेसभत्तिविणयं सुस्सुपज्जुवासइ। एवं चिंतइ। एस पइ धण्णो जेणं मम चरियं न पयासियं। अहं अधण्णा जेण मए भत्तारपुट्ठिं दाविया। अहुणा अह मम जावज्जीव सीलधम्मा अइव मणपिम्मा पंचविहं कामं विहरइ। तए णं से **महेसरदत्ते** अण्णयाकयाइं पिअकम्म सराह आरंभिया। तं दिणे पियावयणं संभारिया एगमहिसं सद्दाविया। कम्मजोए से पियाजीवमहिस सव्वकुडुंब

---

सा महेश्वरपत्नी प्रसूता। सोऽङ्गजोऽतीव महेश्वरदत्तस्य वल्लभोऽहर्निशं स्वोत्सङ्गे निवेशयति। महेश्वरदत्तेन घातितो यो नरः तद्घातितवार्तां न जानाति कोऽपि। यतो मर्मस्थगनं कुर्वन्ति ते पण्डितलक्षणलक्षिता पुरुषाः प्रज्ञप्ताः। तद्यथा – अर्थं प्रणष्टम्, मनोगतं पातकम्, गृहदुश्चरित्रम्, आत्मनो गुह्यम् परापमानत्वम्, एतत् मर्मपञ्चकं पण्डिता विचक्षणा न प्रकाशयन्ति। ततः स **महेश्वरदत्तस्तं** पूर्वं व्यापादितं पुरुषं हत्वा तुष्णीकः सन् सुखंसुखेन विचरति। ततो **महेश्वरभार्या** भर्तुरुपरि विशेषतो भक्तिविनयशुश्रूषां कुर्वन्ती पर्युपासते। तच्चित्तं रञ्जयति। एष वल्लभो धन्यो येन मच्चरित्रं जने न प्रकाशितं न प्रकटितम्। अहं त्वधन्याऽकृतपुण्या येन कारणेन मया भर्तारं पृष्टि दत्ता। अहोऽहमधर्मिणी गुणैरदूषितं पतिमवगणय्य जारपुरुषसार्द्धं भोगाभिलाषान् पूरितवत्या मया कालो नीतः। अत आरभ्य मम यावज्जीवं शीलधर्मं शरणम्, अतीव मनसि प्रेमपूर्णा पञ्चविधमानुष्यकान् कामभोगान् **महेश्वरदत्त**सार्द्धं भुञ्जाना विचरति। ततो **महेश्वरदत्तेनान्यदा** कदाचित्पितृकर्म श्राद्धरूपं प्रारब्धम्। तस्मिन् समये पितृवचनं संस्मरन्नेकं महिषं क्रीणयति मौल्येन लाति। कर्मयोगतः स

साहिय घाया। मंसं खंडं खंडं सव्वं भुंजमाणे विहरइ। तए णं से **महेसरदत्तमाया** जीव साणी निजगिहं वियाणेइ मागया। से महिसअत्थि साणी आसायइ। जीहे मंसरुहिरं आहारेइ।

तेणं समएणं **धम्मघोस** नामं अणगारे निग्गंथे आहारट्ठाए तत्थ उवागच्छइ। नाणजोए असमंजसं पासइ। सीसं धुणइ एवं वयासी-"स पियमंसं सरीरं पोसइ। सत्तु उच्छंगे निवेसावेइ। मम पियदिण उज्जमं साएवं भासइ। एस मोहबिडंबियं।" तए णं **महेसरदत्ते** साहुवयणं सुच्चा अब्भुट्ठेइ वंदइ वंदित्ता एवं वयासी - सामी! एस वयणं अहं न संबुद्ध। तओ पच्छा साहु पुरिसघायं सव्वं निवेइयं। से साहुवयणं साणी सुच्चा जाईसरणे समुप्पन्नं। ते जाईसरणजोए साणीएणं **महेसरदत्तेण** स गिहमज्झे पायाले निहाणं दंसावियं। ते निहाणं **महेसरदत्तं** गिण्हइ। मिच्छत्तमग्गं

---

पिताजीवमर्हिषः सर्वकुटुम्बसमक्षं साक्षिकं घातितः। तत्पिशितं सर्वं स्वजनवर्गं निमन्त्र्य परिवेशितम्। ततस्ते सर्वे मांसमहिषं भुञ्जाना विचरन्ति। ततो **महेश्वरदत्त-माताशुनीजीवो** निर्मितां रसवन्ती ज्ञात्वा जना यत्राभ्यवहरन्ति तत्रैवागता। शुनी तस्य महिषस्यास्थीन्यास्वादयति। जिह्वया मांसं रुधिरमाहारयन्ती सुखं वेत्ति शुनी।

तस्मिन्नवसरे **धर्मघोष**नामा निर्ग्रन्थोऽनगारः साधुराहारार्थमनुपयोगेन तत्रोपागच्छति। ज्ञानेनाभोगयति विलोकयति। ततोऽसमञ्जसं स्वरूपं पश्यति। शीर्षं धूनयति। मुनि हृद्येवं विचिन्तयति-अहोऽनर्थं पितृमांसेन शरीरं पुष्णाति। शत्रुमुत्सङ्गे निवेशयति। मुखे मत्पितृणां मया दत्तमिति ब्रुवन्तं दृष्ट्वा तथैव प्रतिनिवृत्तो यथोपागतोऽभूत्। ततो **महेश्वरदत्तः** साधुवचनं श्रुत्वाऽभ्युत्तिष्ठति अभ्युत्थाय तूर्णं मुनिसमीपमुपागच्छति। मुनिमभिवन्दित्वा तत एवमवादीत् - स्वामिन्! एतद्वचनं भवदुक्तं मया नावबुद्धम्। ततः पश्चादाग्रहात्साधुना यावत्परपुरुषहननादारभ्य सर्वो वृत्तान्तो निवेदितः। ततः साधुवचनं श्रुत्वोहापोहं कुर्वन्त्या शुन्या जातिस्मरणं समुत्पन्नम्। तेन जातिस्मरणज्ञानोपयोगेन शुन्या **महेश्वरदत्तस्य** गृहमध्ये पातालगतं निधानं दर्शितम्। तन्निधानं **महेश्वरदत्तो** लाति। साधुस्तु प्रतिगतः। ततो **महेश्वरदत्तेन**

भोआवेइ। हालिग संतुट्ठो एवं वयासी – एस मंडगगुलं किहं निप्फण्णइ। तया णं भारीआअम्माए जामाइ पइं गहुमंडग बीअं, गुलबीअं, इक्खुखंडं दाविआ। कुवं खणाइ उन्हालीए ववाही इक्खुवावणविही सव्वं निवेइयं। तए णं हालिगो संतुट्ठो सिग्घं जेणेव नियकरसणा तेणेव उवागच्छइ उवागच्छित्ता से पुप्फिय कोद्दवाइं सव्वं अपक्कं आमूलेइ। इक्खुवावणट्ठाए कुवं खणावेइ। तत्थ कुवठाणे सिला उववण्णा तं ठाणं चयइ। अण्णट्ठाणे खणावेइ तत्थवि सिला उववण्णा। तओ पच्छा से हालिगो पच्छातावं करेइ। हा! मया कोद्दवाइ असणं हारिअं, गुलमंडगं न निप्फाइयं। महापच्छातावं वेयइ। सामी ! तहा तुमं भविस्सइ। अम्हाणं सुहं चइत्ता संजमं न एगमणे। तेणं सिद्धिकण्णगं न पाविस्सह ! तेणं अम्ह सद्धिं भोगं भुंजह। पच्छा जराए संजमं गिण्हिस्सह। **( जंबू दिट्ठंते चउत्थो उद्देसो समत्तो )**

## पंचमो उद्देसो – वायसदिट्ठंतो

तए णं **जंबू समुद्दसिरी**पइं पत्तुत्तरं भासइ। सुभगि! अहं **वायस**सरिसो लोही नत्थि। तेण पच्छातावं भवइ। सुणेह – इहेव **जंबू**द्दीवे द्दीवे **भारहे** वासे **भरुअच्छि**नयरे **नरबया**तीरे **गयंद कलेवरे** अत्थि। ते कलेवरभक्खणट्ठाए बहुविहा

---

मुन्मूल्योत्पाट्य निक्षिप्तम्। एतदपि न निष्पन्नम्। अहमितो भ्रष्टस्ततो भ्रष्टः। द्वेऽपि कार्ये विनष्टेऽशनधान्यमुन्मूलितम्, गुडमण्डका अपि न निष्पन्ना। मयोभयं हारितम्। पश्चान्मनसि महत्पश्चात्तापं वेदयति। **समुद्रश्री** वदति – स्वामिन् ! यूयमपि तथैव भविष्यथ। तस्मादस्मत्सुखं विमुच्य संयमैकमनाः पालयितुमशक्ताः सिद्धिवधूगमन-सुखं न प्राप्स्यथ। तेनाऽस्मत्सार्द्धं भोगान् भुङ्ध्वम्। पश्चाज्जरावस्थायां संयमं गृहीष्यथ। **( इति जम्बूदृष्टान्ते चतुर्थोद्देशकः समाप्तः )**

ततो **जम्बू समुद्रश्रियं** प्रत्युत्तरं ददाति – सुभगे ! तन्वङ्गि श्रुणु, प्रियेऽहं **ध्वाङ्क्ष**सदृक्षो लोभग्रस्तो नास्मि येन पश्चात्तापो भवति। श्रुणु सुन्दरि ! इहैव **जम्बूद्वीपे** द्वीपे **भारते** वर्षे **भरुअच्छ**नगरे **नर्मदा**तटिनीतीरे गजेन्द्रकलेवरस्तत्कलेवरं गजरूपं भक्षणार्थं नानाविधविहङ्गमा गृध्रादयो मिलिताः। एकीभूतास्तत्कलेवरं

विहंगमा मिलेंति। से कलेवरे भक्खिल्ले। को वि पंखी नईतडे चिट्ठइ, को वि पुणरवि उवागच्छइ। एवं सुहेणं विहंगमा विहरंति। तेणं मज्झे एगो वायसो अवमदुवारे गयंदकलेवरे पविट्ठो चिंतइ। केण कारणे अहं बाहिरं निस्सरामि। इहं सुहेण आमिसं भक्खेमि। सया इहं चिट्ठिस्सामि। एवं चिंतमाणे तत्थ वायसो ठियो सुहेणं चिट्ठइ। तए णं ते कलेवरे गिम्हकाले अवमदारे संकोचिए होत्था। से वायसे कलेवरमज्झठिए नो निस्सरीयइ। तए णं वासारइ वासा वुट्ठा। से कलेवरं जलजोए समुद्दं पविट्ठं। तया णं ते अवमदारे जलजोए पसरिआ होत्था। स वायसं बाहिरं उवागए। कलेवरं उवरि ठिच्चा दिसापडिलेहणं करेइ। चउदिसिए जलं विणा किंचि नो पासइ। उडिआ पुणरवि कलेवरे ठिया। पुण उडीया कलेवरे ठिया वारं वारं उड्डइ

---

कोऽपि भक्षयति, कोऽपि पक्षी नद्यास्तीरे तिष्ठति। कोऽपि पुनरपि तत्रैवोपागच्छति केचिदुड्डीनाः प्रत्युपागच्छन्ति। एवं ससुखं विहङ्गमा विचरन्ति। तदानीं तेषामन्तरेको वायसपक्षी तस्मिन् गजकलेवरेऽपद्वारेण प्रविशति। प्रविश्यान्तरे चिन्तयति - केन कारणेनाहं बहिर्निस्सरामि ? येनाहमन्तरा सुखेनामिषं भक्ष्यामि। ततोऽत्रैव स्थास्यामि, परिव-सामि। ह्यैवं विचिन्त्य तत्रैव वायसस्तिष्ठति। ततस्तत्कलेवरं ग्रीष्मर्तावपद्वारतः सङ्कुचितं मुद्रितमभवत्। ततः सो वायसस्तस्मिन्नेव कलेवरे स्थितो निष्क्रमितुं न शक्नोति। ततस्तदानीं वर्षासु वृष्टिर्जाता। संप्लावितभूमण्डला स्थलेष्वपि प्राप्यसलिला नद्यौघपूरका। तस्मिन्समये तद्धस्तिकलेवरं जलौघपूरतः समुद्रे प्रविष्टम्, सागरे गतम्। तदानीं तदपद्वारं सलिलसंयोगाद्विप्रसृतं विदलितमित्यर्थः। ततस्तदानीं स वायसो बहिर्भागमुपागतः। कलेवरस्योपरि भागे निषद्य दिगवलोकनं दिग्निरीक्षणं करोति। ततश्चतुर्दिक्ष्वपि जलं विना किमपि न निरीक्षते। तत उत्पतति उड्डीनः पुनरपि कलेवरे निषीदति। पुनरावृत्य पुनरुड्डीन एवमनेकवारमितस्ततो भ्रान्त्वा तस्मिन्नेव कलेवरे तिष्ठति। काको न पुनर्जलप्रान्तं सागरतीरं च पश्यति। विप्रकृष्टतीरत्वात्सागरस्य तेन काकेन तटं न प्राप्तम्। यावत्तत्रैव जीविताद् व्यपरोपितः काकः। ततो **जम्बू** वक्ति - सुभगे **समुद्रश्रिये** ! तादृग् मूर्खो नास्म्यहम्। युष्मच्छरीरभोगलुब्धो न

ते झंपाविओ। ते पुरिसे कवि भूयो। महापच्छाताविओ रुक्खसाहाए ठिच्चा। तए णं तस्स इत्थिया वानरं पिम्मं मुक्का पुणरवि दहमज्झे नो झंपावेइ। तत्थ रुक्खछाए पत्तसरीरं आच्छायइ ठिया। स वानरं असायावेयणी वेयइ। तए णं तस्स वण आसण्णनयरे राया आसकीलणट्ठाए तत्थ वणे उवागच्छइ। उवागच्छित्ता तए णं **विजयसत्तु** राया एसा **सुंदरी** दिट्ठा एवं वयासी – तुमं को वि, कत्थमागया, कत्थ चलसि? तए णं ते इत्थिए एस कविचरिअं निवेइअं।

राया दिट्ठीरागेण मोहं गया। रामा राया–दिट्ठि–वयणे मोहं वसिया। अण्णोण्णं ससहं राया सा इत्थि विवाहिया। सव्वदेवी सिरे पट्टदेवी ठाविआ। विविह वत्थ, विविह आहरणा, विविह कामभोगे सरिसजोए अइव पिम्मभरं विहरइ। तए णं से

---

तत्रैवोद्याने समुपागच्छति। वनक्रीडामश्ववाहनिकां कृत्वा यावत्तत्रैव विचरति तावता **जितशत्रु**राज्ञा सा सुन्दरी रमणी दृष्टा। तां वीक्ष्यैवमवदत् – भद्रे! त्वं काऽसि? कुत आगता? रतिर्वा रम्भा वा किन्नरी वा नरी वा? अग्रे क्व यास्यसि? राज्ञेत्थं सादरं पृष्टा सती तदानीं तया सर्वं कपिचरित्रं यज्जातमभूत्तद्राज्ञे निवेदितम्। राज्ञाऽपि दृष्टिरागेण मोहंगतः सन् तस्याः सन्मुखं मुहुर्मुहुः पश्यति। रामाऽपि राजन्मुखं दृष्ट्वा मोहवशं गता। परस्परं कामव्यथापीडितौ सरागं निरीक्षन्तावभूताम्। ततः सा पौरलोकसमक्षं राज्ञा विवाहिता। सर्वास्वन्तःपुरीष्वन्तरा पट्टराज्ञी स्थापिता। विविधवस्त्राभरणादीनि समर्पितानि। वासभुवनमुच्चैः समर्पितं वसनाय। अथ साऽनेकविधकामभोगोपलब्धौ सत्यां सदृक्षयौवनावस्थादिसंयोगेऽत्यन्तं राज्ञा सार्द्धं प्रेमभरं बिभर्ति विचरति। ततः पश्चात्स कपिः पश्चात्तापं करोति।

तस्मिन्समये कोऽपि नाट्यकारयितापुरुषस्तं कपिं छलेन गृहीत्वा निबध्नाति। प्रतोदप्रहारयोगेन नाट्यं शिक्षयति। शिक्षयित्वा गृहे गृहे तं नर्तयति। कपिप्रसादेन स नरः सुखेनाजीविकां कुर्वन् विचरति। अन्यत्र यत्र राजा देव्या सार्द्धं गवाक्षोपरि स्थितोऽस्ति तत्रैव स नटपुरुषो वनौकेन सहागतः। ततो विविधप्रकारैर्नाट्यं कारयति। कपिना सर्वेऽपि सज्जना नाट्येन रञ्जिताः। तदानीं तं वानरदानार्थं कराङ्गुल्या गृह्णाति।

कवि पच्छातावेइ। तया णं को वि नडपुरिसे से कवि फंदेण गहियो। कसप्पहारजोए नाडयं सेहावियो। गिहं गिहं नच्चाविओ। स वानरपसाए नट्टपुरिसं सुहेण विहरइ। अण्णया जेणेव राया देवीसद्धिं गवक्खे ठियो। तत्थेव स नट्टपुरिसं वानरसद्धिमागयो। विविहं नच्चावेइ। सव्वसहा कवि रंजिया। तेण ते वानर दाणट्ठाए ते देवी अंजलिं गिन्हइ। दाणं जायइ। जया णं वानर देवीमुहं विलोयइ उवलक्खिया। तया णं कवि नयणं अंसु झरइ। हा! एसा मम महिला अइव रूववई। तया णं सा देवी एवं वयइ - केणट्ठेणं कवि रोअइ। देवी उवलक्खिया एवं वयासी - कवि! मा रोयह। जया णं मम तुमं बहुविहं वारिया तया णं मम वयणं न किच्चा अहुणा रुयं किं भवइ। मा रुयह। स वानर नाडयं जम्म पूरियं। तहा सामी तुमं भविस्सइ। अहं वारं वारं कहामि संजमं मा गिण्हह। तुमं अम्ह वयणं नत्थि आराहिअं। पुण पच्छा अइलोहं इहलोअं परलोअं विणस्ससि। तेणं सामी! अम्ह सारिच्छा सुरगिहे नत्थि। सुहंसुहेण

---

देवी पाणिना तत्पाणिं संस्पृशति इत्यर्थः। संस्पृश्य तस्य करतले यावद्दानं ददाति तावद्वानरो देवीमुखसन्मुखं विलोकयति। तं वीक्ष्योपलक्षिता। तेन तदानीं कपिदृग्भ्यामश्रूणि क्षरन्ति। कथम् हा ममैषा महिला। अतःकारणादतीव रोदिति कपिस्तां स्मृत्वा स्मृत्वा। तदानीं सा स्त्री तमित्थं वदति - केनार्थेन रोदिषि कपे! कपिर्वदति - देवि! त्वां निजस्त्रियमुपलक्ष्य रोद्मि। ततः सा देवी अवदत् - वानर! मा रोद। यदा मया बहु वारितस्तदानीं त्वया मच्छिक्षाक्षरं वचनं नाङ्गीकृतं न प्रतिपन्नम्। विविधप्रकारैर्निषिद्धोऽपि त्वं मद्वाक्यं नास्प्राक्षीत्। ततोऽधुना रोदनेन किं भवति। तस्मान्मा रोद। मन स्थिरं कुरु। तत्स्वरूपं देवीवानरजं राज्ञा दृष्टं पृष्टं च तया निवेदितं यथाजातम्। ततस्तस्य कपिर्जन्म नाटकेन पूर्णीचक्रे। ततः **पद्मश्री** बभाषे - स्वामिन्! यूयमपि तद्वद्भविष्यथ। अतो वारं वारं मयोच्यते-स्वामिन्! यूयमिदानीं मा गृह्णीत संयमम्। मद्वचनं नाराधयिष्यसि तदा पश्चात्तापं करिष्यति। अतिलोभादिहलोकसुखावुभौ विनश्यतः। स्वामिन्! अस्मत्सदृक्षाः सुन्दर्यः सुरालयेऽपि सुराङ्गना न सन्ति। तस्मादस्मत् सार्द्धं विलासं कुरु। यथेच्छं

हिरण्णकारपुत्ती पाणिं गिन्हाविया। हिरण्णगारपुत्त भारिआ सद्धिं अन्नोन्नं महामोहं पिम्मं विहरइ। पियावयणं न आराहेइ। अण्णया पुत्तभारिया अन्नपुरिस सद्धिं भुंजमाणे पासइ। तया णं पिया पुत्तं पइं निवेइयं। पुत्त ! तव भारिया अणायारणी अत्थि। तस्स पियावयणं पुत्तं निवेइयं। दुच्चं पि तच्चं पि पुत्तं पियावयणं न मन्नइ। आसरुत्ते पिया पइ एवं वयासी – जज्जरपुरिसा! मोणं कुरु, एरिसी को वि सीलवई नत्थि। तया णं ते जज्जरसुवण्णगार पच्छण्ण पढमरयणी ठियो। तए णं सा अणायारणी जया णं ते अण्णपुरिसं सद्धिं सिज्जाए सुत्ता तया णं जज्जरहिरण्णगारे पच्छण्ण पुत्तभारिया पाउनेउरं सणियं गिन्हइ पणट्ठो। तया णं अणायारणी वियाणिया

---

नाराधयति नादरयति।

ततोऽन्यदा पुत्रपत्नीमन्यपुरुषेण सार्द्धं भोगान् भुञ्जानां सम्भोगासक्तामीदृक्षां पश्यति। पिता तद्वृत्तान्तं सुतं प्रति निवेदितम् – पुत्र ! त्वत्पत्न्यनाचारिणी परपुरुषगामिन्यस्ति। सुतस्तद्वचनं न श्रद्दधाति। ततः स जीर्णसुवर्णकारोऽन्यदा प्रच्छन्नः प्रथमरजन्यां स्थितः। ततस्तेनाऽन्यदा रजन्यां पुनरपि सा तथैव दृष्टा। सुवर्णकारेण पुनरपि पुत्राय निवेदितम्। तदापि पुत्रस्तद्वचनं न प्रतीच्छति न मनुत इत्यर्थः। द्वित्रिर्वारं पित्रोक्तं तथापि सुतो न मनुते। यतः –

★ **रत्ता पिच्छंति गुणा दोसा पिच्छंति जे विरत्ता य।**
**मज्झत्थिया य पुरुसा गुणेसु दोसेसु रज्जंति॥**

ततः पश्चादासुरत्वं चण्डत्वभावमुपागतः पुत्रो जराजर्जरित-मुवाच-डोलत्करत्वं मुहुर्मुहुर्वदसि मिथ्यात्ववचनम्, मौनमवलम्ब्य तिष्ठ, जोषं कुरु, ईदृशी शीलवती कापि नास्ति। त्वं न जानासि वृद्धत्वाद्विकलमतिरसि। तेन निर्भर्त्सितः-, धिक्कृतस्तदानीं स वृद्धहेमकूट प्रच्छन्नवृत्त्या प्रथमयामिन्यां जाग्रतः स्थितः। ततः साऽन्यदा रजन्यां यदाऽन्यपुरुषेण सार्द्धं शय्यायां सम्प्राप्ता पर्यङ्के निषण्णा। पश्चात्तेन साद्‌र्धं यथेच्छं कामाभिलाषान् पूरयित्वा यावत्सुप्ता तदानीं जराजर्जरितस्वर्णकारः प्रच्छन्नवृत्त्या पुत्रवधूपान्नूपुरं स्वनितं शब्दितं श्रुत्वा तन्नूपुरं वधूपादाल्लघुहस्ततया

मम नेउरं गिन्ही गयो। तया ते अण्णपुरिसो विसज्जियो। तं ठाणे नियपइ सद्दाविओ। सिज्जासया विहरइ। तए णं ते भारिया खणंतरि एवं वयासी – पाणवल्लह! जागह तुमं पिया अहुणा मम पायनेउरं गिन्हइ। पणट्ठाओ गच्छइ गच्छित्ता पच्छा एवं भासिस्सइ। मया एस कुलवहु अण्णपुरिससद्धिं सिज्जाए नेउरं गहिया। पाणवल्लहा! पच्छा तुमं जाणह। अहं किं न याणामि। तए णं विभासमए पुत्त पिया पइं एवं वयासी – पिया! केणट्ठेणं रयणीसमए मम सिज्जाए लज्जासमए आगतो। तए णं से जज्जरहिरण्णगारे पुत्त पइं अण्णपुरिसाइसव्वं निवेइयं। ते वयणं पुत्त न मन्नइ।

---

निष्कास्य गृहीत्वा प्रणष्टः। तदानीं साऽनाचारिणीवधूस्तन्नूपुरं श्वसुरगृहीतं स्वरूपं विज्ञाय तदानीं साऽन्यपुरुषं विसर्जितम्। विसृज्य तस्मिन्नेव स्थाने निजपतिं शब्दापयित्वा आह्वयित्वा शय्यायां सुप्ता कपटनिद्रया। ततः सा भार्या क्षणान्तरे तमेवमवादीत् – प्राणवल्लभ! जाग्रत। निद्रां जहीत। वीक्षध्वमधुनैव त्वत्पिता मदीयं पादनूपुरं गृहीत्वा पलायितः प्रणष्टः। ततो यूयं व्रजत व्रजत पश्चादेवं सम्भाषयिष्यति मयैतस्याः कुलवध्वान्यपुरुषेण सार्द्धं पर्यङ्कसुप्ताया नूपुरं गृहीतमेवं कथयिष्यति ततो यूयं पश्चाच्छीघ्रं यात यात प्राणवल्लभ! ततः परं यूयं जानीत। अहं किमपि न जानामि। ततः स स्वर्णकारसुतो विभातसमये पितरं प्रत्येवमवादीत् – पितः! केनार्थेन रात्रिसमये मच्छय्यायां लज्जासमये आगतः? नूपुरादानवार्ता सर्वा निवेदिता। ततो वृद्धस्वर्णकारेण पुत्रं प्रत्यन्यपुरुषादिसर्वं वृत्तान्तं निवेदितम्। तद्वचनं सुतो न मनुते। पुत्रपित्रोः परस्परं विरोधो जातः।

पश्चात्तदनन्तरं वृद्धस्वर्णकारस्य निद्रा प्रणष्टा। ततोऽहर्निशमार्त्तध्यानं वेदयति सङ्कल्पविकल्पे ध्यायन् विचरति। ततोऽन्यदा पुत्रवधू भोजनं न भुनक्ति। रुष्ट्वा स्थिता एवं वक्ति – तदानीमहं भोजनं भुनज्मि, जेमेमि, यदा चाहं दिव्यं कृत्वा निष्कलङ्कं भवामि। ततोऽहं नागरिकलोकसमक्षं सप्रभावदेवतासाक्षिकं दिव्यं करिष्यामि। देवताङ्गं संस्पृशामि। यदा चाहं पापकारिणी भविष्यामि तदा मां देवता भक्षयिष्यति, यदा चाहमाचारवती तदा न भक्षयिष्यति। ततोऽनन्तरं भोजनं भुनज्मि।

दावेह। एवं भासमाणे सप्पभावदेवया संघट्टिय बहिरं आगया। सव्वजणाओ समारिं भासइ। जयजयारव सद्द वित्थरइ।

जज्जर हिरण्णगारं पुत्ताइसव्वजणा हिलंति निंदंति गरहंति। सयं सयं गिहं सव्वजणा पडिगया। तया णं ते जज्जरसरीरं हिरण्णगारं महाअट्टदुहट्ट वेयइ। हा! इत्थिचरियं को वि न वियाणइ। को वि पंडिया तारा गणेइ। गहगण संखा करेइ। गहनेयं वियाणेइ। राहु-रवि-ससिचरियं वियाणइ। पुण इत्थिचरियं को वि देवा न याणंति। तओ मणुआ विसेसं न याणंति। एवं अट्टदुहट्टवसिए विसेस अनिद्दे भवइ।

---

राज्ञोक्तं तथैवेत्यङ्गीचकार।

अथ सो राज्ञः प्रासादगृहानुच्चैर्गवाक्षजाले दर्शनीयेऽभिरूपे यावत्प्रतिरूपे राज्ञादेशात्संस्थितः। तत्रैवाऽहर्निशं निवसतीत्यर्थः। चतुर्दिक्ष्वपि भाण्डागारमन्तःपुरं च विलोकयन् विचरति। ततः सोऽन्तःपुरसौधसमीपसौधगवाक्षमध्यवर्ती मध्यरात्रिसमय अन्तःपुरपृष्ठद्वारे पट्टगजेन्द्रं हस्तिपक सहितस्तमागतं पश्यति। ततस्तत्र पट्टहस्ती पट्टराज्ञीं शुण्डाहस्तेन प्रासादपश्चाद्गवाक्षद्वारतः सङ्गृह्य स्वकुम्भस्थलपृष्ठप्रदेशे संस्थापयति, आरोहयति। ततो हस्तिपकः पट्टराज्ञी सार्द्धं सुरतसुखं सर्वदाऽनुभवति। तस्मिन् दिने सा राज्ञी कर्मयोगात्तद्वाराच्च क्षणघटीकालमात्रं विलम्बं कुर्वन्ती सद्यो नागता। तदा तेन हस्तिपकेन हस्तिस्कन्धोपरि पूर्वं यावद्गाढदुर्वचनैर्निर्भर्त्सिता पश्चात्ताडिता हस्तिशृङ्खलया देवीम्। तथापि सेत्थमवादीत् – स्वामिन्! ममैकापराधं क्षमस्व। अद्यपश्चात्तत्कालमुपागमिष्यामि। पश्चात्तेन प्रेमवाक्योपशान्तेन देवीवचनामृताभिषिक्तेन निषादिना सोपभुक्ता पञ्चेन्द्रियविषयसुखैः। पश्चाद्धस्तिना कराग्रेण गृहीत्वा तद्द्वारात् तस्मिन्नेव सौधे विमुक्ता राज्ञी। पश्चाद्गजेन्द्रसहितो गजपालकः प्रतिगतः स्थाने।

एतच्चरित्रं राजकुलसमुद्भवं वीक्ष्य वृद्धकलादस्यैवंविधः सङ्कल्पः समुत्पद्यत। यद्येतस्मिन् राजवेशमनीदृग्विधचरित्राणि सन्ति। ततो मदीयं वेश्मनि कियन्मात्रम्। कोऽहं केन गणनया गण्यते। यतः को जानाति मामितः

से हिरण्णगारे जज्जरीए अनिद्दाए पुरुसे नयरमज्झे वित्थरिया। अन्नोन्नं बहुजण एवं संलवंति-जज्जरहिरण्णगारे अनिद्दाए अत्थि। से अनिद्दपुरिसे राया सद्दाविया एवं वयासी - भो अनिद्द हिरण्णगारा! मम अंतेउरं भंडारोवरिं चिट्ठह। तेणं विलोयह। तए णं ते अनिद्दपुरिसा तह त्ति। रायपसायं गिन्हमाणे उड्डगवक्खेणं सयाए ठियो। चोद्दिसं भंडागारं अंतेउरं विलोयमाणे विहरइ। तए णं मज्झरयणी समए अंतेउरपिट्ठदुवारे पट्टगयंद कुंतार**सहियमागया**। तत्थ पट्टदेवी गयंदनासाए विलगा। हत्थिपुट्ठि ठिया। तत्थ कुंतार पट्टदेवी सद्धिं भोगं भुंजइ। भुंजइत्ता पट्टदेवी गयंदनासाए गहिए नियगवक्खं गया। तओ पच्छा कुंतार गयंदसहिअं पडिगयो।

---

पूर्वमार्त्तध्यानोपगतोऽभूत्तन्मिथ्याऽऽत्मानं परिक्लिश्यन्नभुवं तन्मया वृथा, शोचनौदासीन्यं विहितम्। यतो महामाण्डलिका:, महाछत्रपतय:, बहुविज्ञानकुशला:, भञ्जनघटनसमर्था:, महापराक्रमा:, प्रत्यक्षसहस्राक्षप्रतिमा:, नरपतयस्तेऽपि स्त्रीभिरङ्गुल्यग्रे नर्तिता:। इन्द्रचन्द्रकेशवरुद्रादयोऽपि मुषितास्तदाहं महामूढोऽस्मि। वृथा शोचयामि। यदेतद्राजवेश्मनीदृग्विधं स्त्रीचरित्रम्, तदा किं नाम मदीयं गृहं मन्ये। एवं विचिन्त्यार्त्तध्यानं विसृज्य सुप्त:। सुखेन निद्रा तस्यागता। यताउक्तं **भारतीये नाट्यशास्त्रे** निद्राकारणानि, एभ्यो निद्रा संभवन्ति।

**★ आलस्याद् दौर्बल्यात्क्लमाच्छ्रमाच्चिन्तनात्स्वभावाच्च।**
**रात्रौ जागरणादपि निद्रा पुरुषस्य संभवति ॥ १ ॥**

ततो विभातसमये राजपुरुषैरागत्य जागरितोऽपि न जागर्ति। कथञ्चिन्महता कष्टेन जजागार। ततस्ते राजपुरुषास्तं गवाक्षारुढकं वृद्धकलादं राज्ञ: समीपं समानयन्ति। ततो राज्ञा प्रणामानन्तरं तं पृष्टम्। भो वृद्धकलाद ! केन हेतुनाऽतिप्रमीला तवाद्यागता, सत्यं वद। भो ! अन्यदिनेषु जागरुको प्राहरीक आसीस्त्वम्। ततो राज्ञो भृशमाग्रहात्तेनोक्तम् - स्वामिन्! मा पृच्छ न वदाम्यहम्। पुनरपि भूपतिना विशेषत: पृष्ट:। केन हेतुना निद्रा प्रचुरा तवागता। तदा राज्ञा मुहुर्मुहुर्निद्राकारणे पृष्टे सति स हिरण्यकारो राज्ञोऽग्रे श्वसुरो वधूदुश्चरित्रं पूर्वं प्रकाशितवान्। पश्चाद्राजस्त्रीचरित्रं

एस चरियं जज्जर-हिरण्णगारं पासइ। पासित्ता एवं अब्भत्थिए। रायगिहे एस चरियं तओ णं मम गिहे को नाम। अहं अट्टदुहट्ट वेइज्जमाणे से मिच्छा। जे महामंडलीया, महाछत्तवइ, महापरक्कम्मा, महाविण्णाणकलाकुसला, पच्चक्ख-सरसईतुल्ला ते वि पुरिसा इत्थीहिं अंगुली उवरिं नच्चाविया। तओ एस राय मम गिहं कुण नाम। एवं चिंतिय अट्टदुहट्ट विसज्जिया। सुहेण निद्दामागइ। नो वि जग्गइ। तया णं विभायसमए राया ते अनिद्दपुरिसा जग्गाविया। राया पुच्छइ - हिरण्णगारा! केण कारणेणं अइनिद्दामागया। हिरण्णगारं वयइ - राया मा पुच्छह। न भासामि। तओ राया पुण पुण विसेसं पुच्छइ। केण कारणेण निद्दामागया। तया णं से

---

निवेदयति। सर्वमामूलचूलतो वृत्तान्तं राज्ञा तं पट्टदेव्याः श्रुतम्। पट्टराज्ञीचरित्रं विदित्वा हेमकारं प्रति वदति - हेमकूटकेन चिह्नेन विज्ञायते सत्यम्। ततो सोऽवादीत्। स्वामिन्! भवदीयान्तःपुरे यावन्त्यो ललनाः सन्ति तावन्त्यः सर्वा आकारणीयाः शब्दापयितव्याः। ततो यूयं पुष्पकन्दुकं हस्तन्यस्तं कृत्वा सर्वास्ता ईदृगादेशे प्रयोक्तव्याः। अद्य सर्वास्त्रियो मदक्षिपुरतो निर्गच्छन्तु निष्क्रमन्तु मुखे वाचाम्यहं पुष्पकन्दुकक्रीडां भवद्भिः सार्द्धं प्रत्येकं चिकीर्षामि। पुष्पकन्दुकप्रहारो मया मुच्यते भवद्भिः सोढव्यः। इत्थं कृते या तासां मध्ये पुष्पकन्दुकप्रहारेण व्याजमुद्भावयन्ती भूमौ निपतति तस्या गात्रे शृङ्खलाघातचिह्नं भवेत् चेद्यदि तदा सत्यमवसेयं मद्वचसि प्रतीतिरानयितव्या। ततो राज्ञोपदिष्टं तथैव विहितं सत्यस्वरूपं विज्ञाय राज्ञा हेमकारो बहुसत्कारसन्मानप्रसाददानेन प्रतिविसर्जितः। स्वगृहे प्रेषितः।

ततो राजाऽऽसुरत्वं चण्डत्वभावमुपागतः। कोपारुणलोचनः पट्टराज्ञीं पट्टहस्तिनं गजपालकं च शब्दापयति। स्वसेवकेभ्यो निर्देशो दत्तः। भो सेवकपुरुषा! एनं देवीं गजाधिरूढां गजारूढं कृत्वा नगरमध्यंमध्येन त्रिकचतुष्कचतुष्पथादिषु घोषयन्तो यो यादृक्कर्म करोति स तथाफलं प्राप्नोतीति ब्रुवन्तो नगरान्निर्गत्य यत्र शैलशृङ्गं तत्रैव व्रजन्तु। ततस्तत्र गत्वा हस्तिनं निषादिनं राज्ञीसहितं शैलशृङ्गमा-रोहयित्वा पर्वताधिरूढं गजं कृत्वा सर्व एकीभूता गजेन्द्रं पातयिध्वं शैलकूटाद् मा

हिरण्णगारे अप्पमहिलाचरियं निवेइयं पच्छा पट्टदेवीचरियं निवेइयं। तए णं हिरण्णगारो पडिविसज्जिओ। राया आसुरत्तो उवागच्छइ उवागच्छित्ता पट्टदेवी, पट्टहत्थी, कुंतार सद्दाविया। पट्टदेवी गयंदं ठाविआ कुंतार आसन्ने नयरमज्झंमज्झेणं जेणेव पव्वयसिहरे तेणेव उवागच्छइ। उवागच्छित्ता गयंदं दुरुहाविया। राया कोडुंबियपुरुसा एवं वयासी - सेवया! एस गयंदसहिया कुंतार-देवी सिहरं पुठि ढोलह। विलंबं मा कुरु। तया णं ते कोडुंबियपुरिसा सिहरसमीवं गया। रायावयणं उग्घोसइ। तया णं

---

विलम्बं कुर्याः। ततस्ते कौटुम्बिकपुरुषास्तथैवेति प्रतिपद्य शिखरसमीपं समुपागता राज्ञो वचनमुद्घोषयन्तः। सर्वपुरीविलोक्यमानः स गजः स्वस्यैकमग्रपादमम्बरमुच्चैः स्थितं कृत्वा स्थितः। भावार्थस्त्वयम् उत्पाटितपादाग्रोऽभवत्। ततस्त्रिभिश्चरणैः शरीरभारमुद्वहति। तदानीं मन्त्रिसामन्तादिसर्वे जना राजानं विज्ञपयन्ति - हे नरेन्द्र! एषो हस्ति लक्षणोपेतो हस्तिलक्षणैरुत्तमोऽस्ति। सहस्त्रयोधा लक्षयोधाः संग्रामसमर्थः संग्रामेष्वपराजितोऽतो रक्षणीयो गजः। हस्तिपकराज्ञौ देशाद्बहिर्निष्कासय स्वामिन्! तेषां विज्ञप्ता। पश्चाद्राजागतं प्रत्यानयति, न मन्यते। राज्ञा गजं द्विपद्भ्यामाकाशस्थितं यदागत्य दृष्टं तदा मानितं। राजा सन्तुष्टो गजेन्द्रोपरि प्रसीद्य स्वस्थाने आलानस्तम्भे गजं स्थापयति। निषाददैव्यौ द्वावपि राष्ट्राद्बहिर्निष्कासितौ।

ततस्तौ द्वौ नृस्त्रीरूपावटव्यां परिभ्रमन्तौ संध्यासमये कस्यचिद्पुरःसन्निधौ देवगृहमध्य आगत्य विश्रामितौ पर्युषितौ रात्रिसमये। तस्मिन्समये नगरमध्ये कस्यचिदिभ्यस्य वेश्मनि क्षात्रदानेन धनं मुषित्वा कोऽपि चौरः प्रणष्टः। स चौरस्तस्मिन्नेव स्थाने देवालयान्तरागतः। ततः सहस्त्यारोहभार्या चौरमागतं सरूपं सलावण्यं दृष्ट्वा तत उत्तिष्ठते। निषादिपार्श्वादुत्थाय तत्समीपमुपस्थिता। एवं चौरं प्रत्यवादीत् - मा बिभेषि त्वम्। चेद्यदि केऽपि राजसुभटास्त्वां प्रतिनिबध्नन्ति तदा त्वया वाच्यम् भो। 'अहं परदेशी सभार्यो देवालयमागत्य विश्रान्तोऽस्मि। ततः कश्चिच्चौरो धनं मुषित्वेहागतः। मां पूर्वसुप्तं हननार्थमुपागतस्तदानीमहं भीत इति वाच्यम्। तयैवं चौरः शिक्षितः। पुनरुक्तं तया तस्मिन्समये चेद्यदि सुभटागमनावसरे

सव्वजण विलोयमाणे गयवर एगपायं आगासं ठिओ। तिहुं पाए सरीरभारं वहइ। तया णं मंताइ सव्वलोआ रायं विण्णवइ। नरिंद एस हत्थि उत्तमो, सबलो, जोहो, संगामसमत्थो। कुंतार देवी पएस नियासह। सामी! गयं पच्छा आणावेह। राया नो मन्नइ। गयंदे दो वि पायं आयासं एवं तिण्णिपयं आयासं। राया संतुट्ठो। गयंदे गिहे ठाविओ। महापसायइ। कुंतार-देवी दो वि जणपय निय बाहिरं निस्सारिया।

तए णं ते दुवे परिभममाणे संझासमए को वि नयरपरिसरे देवकुले विसामिया। ते णं समएणं नयरमुसिआ कोवि तेण पणट्ठा तस्स देवकुल मागया। तए णं ते कुंतारभारियाए चोरलोअणा पासइ। उट्ठेइ तस्स समीवे ठिया एवं वयासी - मा

---

त्वामहं कथयिष्यामि त्वं मद्भर्ताऽसि। तदा त्वं मच्छरीरविलग्नो भविष्यत्। मद्देहालिङ्गनं त्वया विधेयम्। एष एव प्राणरक्षणोपायोऽस्ति। कदा ते त्वां चेत्प्रश्नयिष्यन्ति चौरः क्व। तदा त्वया वक्तव्यम् मया न ज्ञायते कुत्रचित्सुप्तो भविष्यति देवालयमध्ये। चेद्यदि त्वं वक्तुमशक्तो भवसि तदाऽहं तेषां प्रत्युत्तरं दास्यामि। परस्परमिति विचार्य तावेकीभूत्वा सुप्तौ। चौरेणापि तद्वचनं प्राणरक्षणार्थं तथैवेति प्रतिपन्नम्।

तस्मिन् समये विभाते जाते नगरराजसुभटाः "क्व चौरः क्व चौरः" इति ब्रुवन्तः समागताः। सन्नद्धबद्धकवचाः, सखड्गाः, शस्त्रपाणयस्तदा सा राज्ञी तानेवमवादीत् - भो सुभटा! कोऽपि स्तेनो भवेत्तदा देवालये विलोक्यन्ते। तदा सुभटा अन्योऽन्यमेवं वदन्ति - कोऽपि स्तेनोऽत्रागतो भविष्यति। कुत्रचित्सुप्तो भविष्यति। इतस्ततो विलोक्यत इति विचार्य स्तेनमन्वेषयन्ति सुभटाः निग्रहार्थम्। तदानीं हस्तिनिषादिनं निरपराधीनं स्वेच्छया सुप्तं विलोकयन्ति। विलोक्यैवं ब्रुवन्त्यन्योऽन्यमेषश्चौरो लब्धोऽस्ति। ततस्तत्कालमिभपालकमवमोटकबन्धनैर्निबध्नन्ति।

ततस्ते तं गृहीत्वा दुर्दशां दर्शयन्तो कुर्वन्तो राजादेशेन यत्र बन्धस्थानं तत्र समानयन्ति। तं निषादिनं शूलिकारोपणं कुर्वन्ति सुभटाः प्रतिनिवृत्ताः। ततो

भीयह तुमं को वि । अहं नयरे तेणे । अहं धणमूसिय पणट्ठा इहमागया । मम पुट्ठि सुहडं मम हणणट्ठाए उवागच्छमाणे । तया णं अहं भीएमि । तया णं देवी एवं वयासी – तुमं मम भत्तारं भवसि, मम सरीरं विलससि । तेण वयइ – हंता भविस्सइ । तया णं ते दुवे एगभूया ।

तेणं समएणं नयरसुहडा आगया सण्णद्धबद्धा । तया णं देवी एवं वयासी – सुहडा ! को वि विलोयह । तया णं सुहडा एवं वयासी – को वि तेण इहमागया । तया णं कुंतारं पासविअ । एस तेणे तक्कालं गहेइ । से कुंतारे सूलीयारोहणं करेइ । सुहडा पडिगया । तए ते कुंतारे इत्थीचरियं वियाणमाणे पाणं नो निगच्छइ । पिवासा

---

हस्तिपालकस्य शूलिकारोपितस्य स्त्रीचरित्रं विजानननानस्य विचार्यतस्तस्य प्राणाः कण्ठप्रदेशान्न निर्गच्छन्ति । तृषा लग्ना तस्य । तस्मिन्प्रस्तावे **जिनदत्त**नामा श्रमणोपासकस्तत्पुरवास्तव्यः स निर्गतः शरीरचिन्तार्थम् । ततः श्मशानभूमौ चौरं तस्करव्यपदेशेन शूलिकारोपितस्य हस्त्यारोहस्य चौरानुमानत्वं **जिनदत्त**मनसि समुद्भासितं शूलिकारोपितं दृष्ट्वा समागतस्तन्निकटं दृष्टं च तत्स्वरूपम् । ततो निषादिना नीरपानार्थं हस्त्याङ्गुल्यादिना संज्ञा कृता वाक्शक्तिर्गता । ततः सो **जिनदत्त**श्रावकस्तत्कृतसंज्ञां मत्वा तं नमस्कारमन्त्रं शिक्षयित्वा यावज्जलोपादानार्थं गृहे गतो झटिति तावत्सो निधनं प्राप्तः । पञ्चपरमेष्ठिमहामन्त्रस्मरणप्रसादेन शुभाध्यवसायेन सौधर्मकल्पे देवत्वेन समुत्पन्नो निषादी यथा **हुण्डक**स्तथा वक्तव्यो भणितव्यः ।

तत्र देवलोके देवभवसम्बन्धिसम्पूर्णसुखान्यनुभवति, विलसति । ततः सा देवी पश्चात्प्रभातसमये जाते स्तेनसार्द्धं विलसति । यथा स्तेनं पश्यति तथा स्वकीयचरित्रविज्ञानकलां स्मरन्ती विमर्शन्ती स्वमनोरथान् पूरयति । यथा यथा मनोऽभिलाषं वेदयते तथा तथा विषयकर्मग्रन्थि निबध्नाति । निबिडकर्मपाशं निगडयति । ततः प्रस्थितश्चौरः सभार्यस्तस्मिन्नवसरेऽध्वान्तरागतां महापगां प्रवहन्तीं पश्यतः । तां दृष्ट्वा चौरस्तदानीं तां प्रत्येवमवादीत् – भो पत्नि ! त्वच्छरीरोप-

समुपन्ना। तए णं **जिणदत्ते** समणोवासिया नमुक्कार सिक्खाविया। जहा **हुंडए** तहा भाणियव्वा। कालं किच्चा से कुंतारजीवे **सोहम्म**देवलोए देवो समुपन्नो। देवसुहं विलस्सेइ।

तए णं ते विभाए समए तेण सद्धिं देवी चलमाणे जहा तेण विलोयइ तहा देवी काम मणोहरे वेयइ। मणे विसए कम्मगंठि बंधइ। ते समए पहमज्झे महानई जलपूरिए पासइ। पासित्ता तए णं तेणं देवीपइं एवं वयासी – भो भारिआ ! तुमं सरीरं एस उवगरणं मम दावेह जउ णं तुमं मम सव्वं उवगरणा गहाय नई पेलाडिए मुयइ पच्छा अहं इहमागमिस्सामि। एवं भासमाणे सव्वाहरणं उवगरणं ओलपट

---

करणाभरणादीनि गृहीत्वा नद्यां परत्रतीरे मुञ्चामि। पश्चादहं द्रुतमागमिष्यामि त्वां नदीमुत्तारयामि। एवमुक्त्वा सर्वोपकरणानि तत्समीपादुत्तरशाटिकां विनोत्तार्य गृहीत्वा सरिदुत्तीर्णः। परतीरं संप्राप्य स्थितः।

ततः सः चौर एवं चिन्तयामास। या स्त्री स्वभर्तारविमुखा स्वपतिं परित्यज्य मत्सार्द्धं सुखं विलसति सा स्त्री किं मम सुखं दास्यति। तस्मादेनां त्यक्ष्यामि। एवं विमृश्योपकरणानि गृहीत्वा मुखं लात्वा प्रणष्टः। ततः पश्चाद्देवी विलोकयति शब्दं पश्चात्करोति। पुनः स्तेन पश्चान्नविलोकयति। ततस्तस्मिन् स्थाने प्राप्ता देवी वस्त्रविवर्जिता नदीतीरे मुञ्जस्तृणस्था रोदिति, क्रन्दति, बहुशोचयन्ती तिष्ठति। तस्मिन्नवसरे स निषादीजीवो देवलोके देवभूतोऽवधिज्ञानेनाभोगयति स्वपूर्वभवं निषादिरूपं पश्यति। ज्ञानोपयोगेन देवीं च नदीतटे वस्त्रहीनां पश्यति दीनावस्थां प्रपन्नाम्।

तदानीं स देवस्तां प्रतिबोधनार्थं देवलोकान्मनुष्यलोकमध्यमुपागच्छत्। देवगत्याऽसङ्ख्याता द्वीपसमुद्रा व्यतिक्रामन् यत्रैव राज्ञी स्थिताऽस्ति तत्रैवोपागच्छति। तत्रोपागत्य जम्बुकरूपमेकं विकुर्वयति रचयति। तत एकं गृध्रपक्षिणं रूपं रचयति। स गृध्र आकाशे परिभ्रमति। जम्बुकमुखे मांसखण्डं विकुर्वयति। पलपेशी शृगालमुखे

विणा सव्वं गहाय नई उत्तराए पच्छिम तडे ठिया। तए णं एवं अब्भत्थिए "जे इत्थी भत्तारं चयइ मम सद्धिं विलसइ। से इत्थि किं मम सुहं दाइस्सइ। तहा एवं चयइस्सामि।" एवं चिंतिउ उवगरणं गहाय पणट्ठो। देवी विलोयइ। सद्दं करइ। पुण तेण पच्छा न विलोयइ। ते तेण तस्स ठाणे गयो। तए णं से देवी एगागी, वत्थहीणा नई तडे मुंजथले ठिया रोयइ। कंदइ ससोयइ चिट्ठइ।

तेणं समएणं ते कुंतारजीवे देवे ओहिनाणं आभोएइ। कुंतारभवं पासइ। नाणजोए देवी पासइ नईतडे वत्थहीणा। तया णं पडिबोहणट्ठाए नईतडे उवागच्छइ। जंबुकरूवं विउव्वइ। एग गिद्धणीरूवं विउव्वइ। से गिद्धणी आयासे भमइ।

---

विरचयति। स जम्बुको नदीतटे मांसकवलं मुञ्चति। नदीमध्ये मत्स्यग्रहणार्थं प्रपलायते, धावति। तदा तस्मिन्नवसरे तद्गण्डोलं गृध्रपक्षी गृहीत्वोत्पतितो वियति परिभ्रमति। वारं वारं शृगालः पलबलं मुञ्चति। तटे तद्ग्रहणार्थं मत्स्यो यावन्निर्गछति नीरात्तीरं धावति तावत्पुनर्गृध्रपक्षी गृहीत्वा पलं ख उद्गच्छति। मत्स्यस्तु जले निमज्जति। तत्कौतुकं देवी विलोकयति। विलोक्योक्तमेकं श्लोकम्-

**★ रे रे जम्बुक निर्बुद्ध मत्स्यस्तु सलिले गतः।**
**न मत्स्यं न च मांसं च आकाशे किं निरीक्षसि ॥ १ ॥**

ततो जम्बुकवाक्यं राज्ञीं प्रति श्लोकः-

**★ पश्यति परदोषं ( च ? ) स्वदोषं नैव पश्यति।**
**न जारो न च भर्तारो जले तिष्ठसि नग्निका ॥ १ ॥**

ततो विकसिता हर्षिता देवी किञ्चित्स्मित्वा तमेवमवादीत् - भो जम्बुक! त्वमुभाभ्यां भ्रष्टस्तथाहमपि। जम्बुक! तव द्वेऽपि कार्ये विनष्टे। तदानीं जम्बुको मनुजभाषया तामेवमभाषिष्टः - भो राजपत्नि! त्वं त्रिभ्योऽपि भ्रष्टा। तद्यथा - प्रथमतो राजा द्वितीयो निषादी, तृतीयश्चौरः, एभ्यस्त्रिभ्योऽपि भ्रष्टा। देव्यहं जम्बुकः पशुजातिरुभाभ्यां भ्रष्टस्तदा किं जातम्, भूतम्। यावदात्मदोषबिल्वफलोपमं न

जंबुयमुहे मंसं। से जंबुए नईतडे मंसकवलं मुंचइ नईमज्झे मच्छगहणट्ठाए धावितो। तया णं से मंसकवले गिद्धिणी गहिअ पणट्ठो। मच्छा नईजले पविट्ठा। देवी विलोयइ। जंबुकं दुवे भट्ठा। तया णं देवी हसिया एवं वयासी। जंबुआ! दुवे भट्ठा। तया णं जंबुआ मणुअभासाए एवं वयासी - रायदेवी! तुमे तिय भट्ठा। तं जहा एग राया, बीओ कुंतार, तिय चोराए तिण्णि तुमे चातुर मणुभट्ठा। अहं जंबू पसुजाइ दुवे भट्ठाओ तओ किं भूयं। जीवं अप्पदोसं बिलवसमाणं नो पिच्छइ। परसरिसवसमाणं दोसं बिल्लवसमाणं पिच्छइ। एस पावजीवलक्खणं। तए णं ते देवी एवं वयासी - जंबूआ! तुमं मम चरियं किं वियाणह। तया णं देवे सयरूवं पयडाभूया एवं

---

पश्यसि। परदोषं सर्षपसमं पश्यसि। यतः -

**★ राइसरसवमित्ताणि परछिद्दाणि गवेसए।**
**अप्पणो बिल्लमित्ताणि पासंतो वि न पासइ॥ १ ॥**

एतत्पापीजीवलक्षणम् पुनरप्क्तम् -

**★ असङ्ख्याः परदोषज्ञाः सङ्ख्याता अपि केचनाः।**
**स्वयमेव स्वदोषज्ञा विद्यन्ते यदि पञ्चषा॥ १ ॥**

**★ सर्वस्यात्मा गुणवान् सर्वः परदोषदर्शने कुशलः।**
**सर्वस्य चास्ति वाच्यं न चात्मदोषान्वदति कश्चित्॥ २ ॥**

ततः सा देवी जम्बुकं प्रत्येवमभाषिष्टः - भो जम्बुक! त्वं पशुजाति मच्चरित्रं कथं विजानाति। तदा देवः स्वस्वरूपं चलत्कुण्डलाभरणं प्रकटीकरोति। प्रकटीभूय तामेवमवादीत् - देवि! यो हस्तिपकजीवः सोऽहं त्वया न विदितो देवत्वेनोत्पन्नोऽहम्। सर्वो वृत्तांतः प्ररूपितः। तदा सा देव्याऽत्मानं निन्दन्ती धिक्कारमुच्चारयन्तीत्थमवादीत् - हा मयाकृतमहमधन्याकृतपुण्या इत्थं ध्यायन्त्यास्तस्या वैराग्यं समुत्पन्नम्, अनित्यभावनां भावयन्ती संवेगभावं प्रपन्ना। ततः सा साध्वी जाता। देवेन धर्मध्वजादिसाध्व्युपकरणादीनि प्रदत्तानि। देवस्तां प्रतिबोध्य यस्यां दिशि प्रादुर्भूतोऽभूत्तस्यां दिशि प्रतिगतः। ततः सा साध्व्यन्यत्र विजहार

वयासी - देवी ! अहं कुंतारजीवे सव्वं निवेइअं। तया णं ते देवी अप्प निंदमाणी एवं वयासी - हा ! मया अकिच्चं किच्चं। अहं अधण्णा। वेरग्ग पाउभूआ। देवसाहीए साहुणी भूया। देव पडिगया। तहा सामी! तुमे अम्हारिसी सुंदरी पाविआ ते सुहं चइत्ता मुत्तिसुहं कंखइ। पुण वल्लह ! रायदेवी इव भविस्सइ ! दुवे सुहं इहलोए परलोए भट्ठा भविस्ससि। तम्हा अहुणा सुहं अम्हसरिसं विलसेह पच्छा संजमं अहं सद्धिं विहरिस्सह। **( जंबू दिट्ठंते अट्ठमो उद्देसो समत्तो )**

## नवमो उद्देसो - विज्जुणमाली दिट्ठंतो

तए णं **जंबू पुमसेणा** पइं पत्तुत्तरं भासइ। पिआ ! अहं **विज्जुणमाली** इव भोगलिप्पमाणे विज्जा ण हारियव्वं। **पुमसेणा** वयइ - सामी ! को वि

---

भूमण्डलोपरि। ततः **पद्मसेना** वदति - तथा स्वामिन्! त्वमस्मत्सदृश्यः सुन्दर्यो मृगाक्ष्यः प्राप्य तत्सुखं त्यक्त्वा मुक्तिवधूसुखं काङ्क्ष्यसिऽभिलष्यसि तदा वल्लभ ! राजपत्नीवद्भविष्यसि। द्वे सुखे इहलौकिकपारलौकिकसुखे द्वाभ्यां भ्रष्टो भविष्यसि। तस्मादधुनाऽस्मच्छरीरसुखं विलसय, पश्चाज्जरासमयेऽस्माभिः सार्द्धं संयमे विहरिष्यत। **( इति जम्बूदृष्टान्तेऽष्टमोद्देशकः )**

ततो **जम्बू पद्मसेना**स्त्रियं प्रत्युत्तरं ददाति भाषत इत्यर्थः। प्रियेऽहं **विद्युन्मालीव** भोगपङ्के लिप्यमानो न भवामि। यथा तेन विद्युन्मालिना भोगलिप्सया विद्या विस्मारिता हारिता इत्यर्थः। **पद्मसेना** प्रवदति - स्वामिन् ! कोऽसौ **विद्युन्माली ?** कथं च विद्या हारिता, गमिता ? तत्कथां ममोपदिशत। **जम्बू** वदति - प्रिये ! श्रुणु अत्रैव **भारते** क्षेत्रे **कुसाढ्य**नाम्ना ग्रामोऽभवत्। तत्र द्वौ विप्रसुतौ परिवसतः। तौ द्वौ **विद्युन्मालिमेघरथा**ख्यावतिदीनौ निर्धनावकिञ्चित्करावविद्या-कीर्तिवन्तावतिदुःखाजीवीदृशौ स्तः, परिवसतः।

अन्यदा कदाचित्तौ द्वौ संवसतः, सन्निधिबहिर्भागे वृक्षशीतच्छायायामुपविष्टौ विद्येते। तत्प्रस्तावे कमपि विद्याधरं तौ पश्यतः। ततस्तावुत्थाय तं प्रणमतः। ततः

**विज्जुणमाली**। कहं विज्जा हारिया। मम उवदिसह। **जंबू** वयइ - इहेव **भारहे** वासे **कुसट्ट** नामं गामं होत्था। तत्थ णं दुवे विप्पपुत्ता परिवसंति - तं जहा आजीविकारहिता **विज्जुणमाली, मेघरथ** नाम निद्धणा। न विज्जा न कित्ती। दुहा जीवीया। ते दुवे अन्नया कयाइं गामबाहिरं रुक्खच्छायाए को वि **विज्जाहरे** पासइ। वंदइ। तया णं ते विज्जाहरे एवं वयासी - भो विप्पा! **चंडाली** विज्जाहरी विज्जा अहं तुमं सिक्खावेइ। मम वयणं पालिस्सह। ते वयणं सुच्चा **विज्जुणमाली मेघरथा** एवं वयासी। हंता! पहु! अहं विज्जापिवासिआ। तए णं ते विज्जाहरे एवं वयासी - तुमं दुवे एग मायंगपुत्ती पाणिगिन्ह। एगंत गामबाहिरं वसह। तओ

---

सो विद्याधरोऽवादीत् ताभ्याम्-भो वर्णज्येष्ठसुतौ श्रुणुत। मत्पार्श्वे **चाण्डालिनी**विद्या विद्यते। सा भवतोः शिक्षयामि मद्वचनं चेत् पालयिष्यताम्। तद्वचनं श्रुत्वा **विद्युन्मालीमेघरथा**वेवं वदतः - भो भदन्त ! भो प्रभु ! आवां विद्यापिपासितौ विद्यागवेषकावित्यर्थः। ततः सो विद्याधर एवमवादीत् - भो विप्रसुतौ ! युवामेकां मातङ्गिपुत्रीमुद्वहताम्। ततो ग्रामस्य बहिः प्रदेशे निवसताम्। ततो मातङ्ग्या भोगान् मा भुञ्जतां सदा ब्रह्मचारिणौ तिष्ठतः। एतन्मन्त्राक्षराण्यहं ददिम तद्युवामेकाग्रमनसौ ध्यायेताम्। इत्थं विधिर्ध्यायन्तोर्युवयो**श्चाण्डालीनी** विद्या षण्मासानन्तरं साक्षाल्लक्षणप्रत्यक्षा भविष्यति। पश्चाद्युवयोर्यथेप्सितं पूरयिष्यते।

तद्वचनं श्रुत्वा तौ यथा विद्याधरेण भाषितं तद्वचनं प्रतिश्रुत्यैवं हृद्यवधार्य यथाविधिर्गुरूपदिष्टरीत्या यद्भाषितं तत्तथैवकर्त्तव्यमिति विनयलक्षणभावेनैकमनसौ मन्त्राक्षराणि हृद्यधिध्यायन्तौ विचरतः। ततो **विद्युन्माली** नामाऽग्रजो मातङ्गीं सुरूपां विलोक्यमानो विषयमोहभावमुपपन्नः। कन्दर्पसर्पदष्टो लोकविरुद्धाचारमपि न गणयति। यतः -

**★ कंदप्पसप्पदट्ठो लोयं न जाणइ मूढो।**
**हूइ बंभचेरभट्ठो रूवारूवं न पासइ ॥ १ ॥**

ततो महाकुरूपमातङ्ग्या सार्द्धं ब्रह्मचर्यभ्रष्टः प्रेमपङ्के निमग्नो हावभाव-

मायंगिणी सद्धिं भोगं मा भुंजह। सया बंभयारी चिट्ठह। अहं मंतसरं तुमं दावेमि। एगमणुज्झायह । छण्हं मासाणं **चंडाली**विज्जा पच्चक्खं भविस्सइ । ते वयणं सुच्चा **विज्जुणमाली मेघरथा** जहा विज्जाहरभासियं तहा कायव्वं। जाव एगमणे मंत्तक्खरं झायमाणे विहरइ । तया णं **विज्जुणमाली** मायंगीरूवं विसयमोहं उववज्जइ। मायंगीहावभाव रयणीएणं निच्चं जणसमए **विज्जुणमालीए** मायंगी सद्धिं बंभं भट्ठा। पिम्मपंक विलग्गा। छमासांतरे **विज्जुणमाली** विज्जा न सिद्धा जेण बंभं मुक्कं। तेणं जाईविडंबणा भूया। पुण विज्जा न सिद्धा। तया णं से **मेघरहो** ते न चुक्को। मायंगी बहुहावभावदंसिआ। पुण छम्मासदढमणे ठियो। चंडालीविज्जा सिद्धा। तओ पच्छा **मेघरहो** विज्जाहर रज्जं लद्धं अणेग रायकण्णा पाणिगहिया। अहियसुहं विलसइ। पिया! तहा तुमं सरीरए मायंगीसमाणं असुअं। **विज्जुणमाली** इव अहं न भवामि। **मेघरह** इव सुहं सिद्धिमज्झे विलसामि। तम्हा अहं संजमं विहरस्सामि। **( जंबू दिट्ठंते नवमो उद्देसो समत्तो )**

---

विभ्रमविलासक्रियां कुर्वतस्तस्य भोगाभिलाषे समुत्पन्ने रजन्यां नित्यं जनेषूपविष्टेषु सत्सु तत्समये **विद्युन्माली**मातङ्गीसार्द्धं कुकर्माचरणं कुर्वन् विचरति। प्रेमपङ्क-निमग्नस्य मोहवशंगतस्य षण्मासानन्तरं **विद्युन्मालिना** मातङ्गी विद्या न सिद्धा। पुनस्तेन ब्रह्मचर्यभ्रष्टेन यद् ब्रह्मचर्यं मुक्तं तत्फलं दुर्दशा तेन दृष्टा। ब्रह्मचर्यपराङ्मुखत्वेन तस्य विडम्बना बह्वीजातेति भावार्थः। परं विद्या तस्य न सिद्धा।

अथ **मेघरथस्त**द्धावभावादिभिर्न क्षुभितः, मातङ्ग्या बहूनि भावानि दर्शितानि। पुनः षण्मासानि यावदडोलचित्तवृत्तिः प्रत्यनिष्ठिपत्। दृढमानसस्य ***मेघरथस्य चण्डालिनी*** *नाम्नी विद्या सिद्धा। ततोऽधिगतविद्योऽसौ विद्याधर-*राज्यमलभत्। अनेकराजवरकन्यापाणिगृहीताः, परिणीताः, अनुक्रमेण महासुखम-धिकसुखं विलसति। प्रिये! तथाऽहं भवच्छरीरे मातङ्गीशरीरोपमेऽशुचिरूपे **विद्युन्मालीव** लुब्धो न भवामि। कामुकत्वात्तस्य विद्यारूपसम्पत्तिर्न जाता। केवलमापत्तिभागी जाताः ततोऽहं **मेघरथ**वत्सिद्धिवधूसुखं विद्योपमं विलसिष्यामि। परमानन्दपद-मनन्तसुखमनुभविष्यामि। **( इति जम्बूदृष्टान्ते नवमोद्देशकः )**

## दसमो उद्देसो – खेत्तकोडुंबिकदिट्ठंतो

तए णं **जंबूं** चउत्थी भारिया **कणगसेणा** एवं वयासी – सामी ! तुमं संजमं मा गिन्हह। अम्हारिसी इत्थिसरीरं चइत्ता संजमं गिन्हस्सओ। तया णं तुमं सिद्धिसुहं न भविस्सइ। अइलोहं खेत्तकुडुंबिको इव भविस्सइ। सामी ! सुणेह – इहेव **जंबूद्दीवे** दीवे **भारहे** वासे **सूरपुरे** गामे को वि कोडुंबिको वसइ। स करसणं आजीवं विहरइ। पंखी उड्डाणट्ठाए माले आरोहइ। संखं पूरेइ। संखसद्दे को वि

---

ततोऽनन्तरं **जम्बू**भार्या **कनकसेनै**वमवादीत् – स्वामिन्! यूयं संयमं मा गृहणीध्वम्, यतोऽस्मत्सदृश्यो युवत्यस्तासां शरीरसङ्गमलब्धं सुखं विजह्य संयमं चेद्यूयं प्रतिपत्स्यतः, तदा भवतां सिद्धिसुखमपि न भविष्यति, न सम्पत्स्यते। अतिलोल्यात् क्षेत्रकौटुम्बिकगतिर्भविष्यति। स्वामिन्! श्रुणुत। अत्रैव **भारते सुग्रीवपुर** नाम्नि ग्रामे कश्चित्कौटुम्बिकः परिवसति। महल्लोभाविष्टः स कर्षणं करोति। कर्षणेनाजीविकावृत्तिं व्यवहरति। शकुन्तोड्डापनार्थमहर्निशमालकमारुह्य निषीदति। मालकोपर्यध्यास्त इत्यर्थः। तत्रारुह्य शङ्खं पूरयति, ध्माति। तच्छब्देन विहङ्गमाः पशवश्च कर्षणान्नं न भक्षयन्ति। सोऽनया रीत्यैवं विचरति। सोऽन्यदा मालके स्थितस्तदा च रजन्यां कोऽपि पल्लीपतिसेवकः **सूरपुर**ग्राममध्ये स्तेनार्थं प्रविष्टः, परपशून् गृहीत्वा ग्रामान्तरात्प्रणष्टः यत्र तत्क्षेत्रसमीपं तत्रैव क्षेत्रपथमध्य उपागतस्तदानीं पशुरवं हम्भाशब्दं श्रुत्वा माले स्थितः कौटुम्बिकोऽन्नरक्षणनिमित्तं शङ्खशब्दं पूरितवान्। ततश्चौरः प्रपलायितः, पशून् मुक्त्वा प्रणष्टः। तान् गोमहिष्यादिपशून् कौटुम्बिकः सङ्ग्राहयति। ततो गतोऽन्यस्थाने तान्विक्रीणाति विक्रीणन्नेवं पशून् कार्षिको धनाढ्यो जातः। समृद्धो यावद् द्वित्रिर्वारमेवं पशून् विक्रयित्वा बहुधनं सङ्गृहीतम्।

ततः पल्लीपतिः समेताः पल्लीवासिनस्तु चतुरपुरुषाः सन्नद्धबद्धाः पल्लीपतिः समन्विता यथा पूर्वं तथा कम्बुशब्दं श्रुत्वा तत्रोपागच्छन्ति। पल्लीपतिः क्षेत्रं परिवेष्टयित्वा स्थितः, क्षेत्रमुपरोध्य कौटुम्बिकं बद्ध्वा, गृहीत्वा च बहुशो निर्भर्त्सयन्ति,

विहंगम्मा वा पसु नो करसणं भक्खेइ। एवमेव विहरइ। अण्णया रयणी माले ठिया ते कोडुंबि तेण रयणीए को वि पल्लीवासी तक्करो **सूरपुरे** पविट्ठो। परपसु गहिय पणट्ठो। जेणेव से खेत्तए तेणेव से पहमज्झे उवागओ। तया णं पगरवं सुच्चा माले ठिओ कोडुंबिय अण्णरक्खणट्ठाए संखसद्दं पूरिओ। तया णं ते चोरा पणट्ठा। कोडुंबिय ते पसु गहाय अण्णट्ठाणे विकिया। धणड्ढी जायो। दुच्चं पि तच्चं पि एवं पसु गहाय बहुधणं संगहियं। तए णं पल्लीवासी अण्णयाकयाइं सण्णद्धबद्धा जहा पुव्विं तहा संखसद्दं सुच्चा स पल्लीवासी खेत्तं परिवेढंति। कोडुंबिकमम्मं वियाणिया से कोडुंबिय गहाय बहु हीलमाणे ताडंति। अवउडगं बंधंति। पुव्वं धणं, खेत्तं सव्वं पल्लीवासीए गहियं। पुव्वनीमियं हारीयं ते पल्लीवासी पडिगया। विभायसमए लोयं आपुच्छइ – कुडुंबि ! रयणीए किं भूयं। कुडुंबिअ वयइ – एस लोहफलं। तहा सामी ! तुमं अइलोहं भविस्ससि। तम्हा अहुणा सुहं विहरह पच्छा सद्धिं संजमं विहरिस्सह। **( जंबू दिट्ठंते दसमो उद्देसो समत्तो )**

---

हीलयन्ति, ताडयन्ति, त्रासनकप्रहारैः क्लेशयन्ति, विडम्बयन्ति। ततोऽवमोटन-बन्धनैर्बद्ध्वा पूर्वम्, पश्चात्तद्धनक्षेत्रे सर्वे पल्लीवासिनश्चौरा गृह्णन्ति, स्वाधीनं कुर्वन्ति। पूर्वोपार्जितं वित्तं सर्वं क्षणमात्रेण हारितम्, गमितमित्यर्थः। ततस्ते पल्लिवासिजना-स्तत्सर्वं स्वापतेयं गृहीत्वा प्रतिनिवृत्ताः, प्रतिगताः। विभातसमये जाते पौरलोकास्तं पृष्टवन्तः। बाहुबद्धमापृच्छन्ति – भो कौटुम्बिक ! रजन्यां त्वच्छिरसि किं किं जातं व्यतीतम्, किं किं सुखमनुभूतम् ? तदा कौटुम्बिको वदति – भो जना ! क्षतेरुपरि क्षारं किं ददतः। किं बहुनेहलोकफलं समुपस्थितम्। यतोऽत्युग्रपुण्यपापानामिहैव फलमादिशेत्। त्रिभिर्वर्षैः, त्रिभिर्मासैः, त्रिभिः पक्षैः, त्रिभिर्दिनैरिति। ततः **कनकसेना जम्बू** प्रत्येवमवादीत् – स्वामिन् ! त्वमप्यतिलोभात्तद्वद्भविष्यसि। तस्माच्छरीर-समुद्भवसुखे विचरत। **( इति जम्बूदृष्टान्ते दशमोद्देशकः )**

ततो **जम्बू** प्रत्युत्तरं भाषयति – प्रिये ! युष्मच्छरीरभोगेष्वहं न लिप्ये। जीवेनानेनानेकभवेषु भोगविलासानि कृतानि। तथाप्येषो जीवो न तृप्तः। भोगेषु तृप्ति

# एकादसमो उद्देसो - वानरदिट्ठंतो

**जंबू** पत्तुत्तरं भासइ। पिया ! तुमं सरीरभोगं अहं न लिंपामि। अणेगभवे भोगविलासं कुज्जा। तओ एस पाणी न तप्पत्तिआ। तेण अहं वानर इव न भवामि। सामी! को वि **वानर** ते मम उवदिसह। **जंबू** वयइ - को वि ठाणे एग वणं पन्नत्तं। विविहरुक्खा तं जहा - अंब, जंबू निंब, कदंबग, वट, पिप्पल, नालीयर, चंचा, नारिग, फोफल, फणस, बीजपूर, पिपरि, रायणि, बबुल, ओदव ? करमंदा, नागवल्ली, आतुलि, वेवुल, चंपक, सेवंती, जातीफल, तमाल बोलसिरी, बदरी, जाइवल्ली, पुन्नागवल्ली, दक्खा, अणेगविहपुप्फरुक्खा, अणेगविहा फलरुक्खा, अणेगविहा कंटरुक्खा, अणेग जलासया।

तेणं वणमज्झे **वानर**जुअलं वसइ। सुहेणं विहरइ। अण्णया तत्थवणे

---

कदापि न प्रपेदे। नापन्न इति भावः। यतः-

**★ धनेषु जीवितव्येषु स्त्रीषु चाहारकर्मसु।**
**अतृप्ता प्राणिनः सर्वे याता यास्यन्ति यान्ति च ॥ १ ॥**

भद्रे ! तेनाहं **प्लवग** इव न भवामि। साऽवादीत् - स्वामिन् को वानरस्त-द्वार्तामुपदिशत। **जम्बू** वक्ति - प्रिये ! श्रुणु। कस्मिन्स्थाने महदेकं काननमभवत्। तत्कीदृशं प्रज्ञप्तम् ? सजातीयविजातीयविविधवृक्षावलिविराजितम्, तानि वृक्षनामा-न्यम्बनिम्बकदम्बजम्बूवटपिप्पलनालिकेर चम्पकनारिङ्गपूगपनसबीजपूरपीप्पल-राजादनपानबब्बूलकरमदा आम्लनिचुलसेवन्त्रीजातिफलतमालविमलश्री कर्कन्धू-जातिवल्लीद्राक्षाशीर्षफलाद्यनेकविधपुष्पवृक्षाऽनेकविधकण्टकवृक्षाऽनेकजला-श्रयादिनानाविधवृक्षराजिविराजितम्। तस्मिन्नेव वने कपिवानरीयुगलं निवसति। सुखेन विचरति।

अन्यदा तत्र वने तरुणवानरो मदोन्मत्तः कश्चिदन्योऽगाद्। अन्योन्यं विरोधेन तौ युध्यत। तदानीं सो वनवासी वानरः प्रणष्टो हीनबलत्वात्। कस्मिन्निरणतटे प्राप्तः। तस्मिन्समये सो वानरः पिपासावशतः कस्मिंश्चित्क्लिन्नकर्दमस्थाने जलं

तरुण**वानर**मागयो । अन्नोन्नं विरोहे जुज्झेइ । एगो वानरो पणट्ठो । को वि गिरितडे पत्तो । तेणं समए स **वानर** पिवासवसिए रालंकद्दमठाणे जलं वियाणीआ कविएणं वारिट्ठाए मुहं कद्दम पविसीया । तया णं ते रालमुहं विलग्गा । हत्थि सोचे । हत्थि राल विलग्गा । जहा जहा सीतलसरीरं भवइ तहा तहा **वानरं वानरी** कद्दमं लिंपायइ । पुण पिवासा न पणट्ठा । सव्व सरीर कद्दमं आच्छाइया । पिवासा न भग्गा । । तओ पच्छा जहा जहा सूरकिरणे कद्दमं सरीरे सुक्कइ तहा तहा सरीरं वेयणा वेयइ । पिया ! एवमेव अहं न लिंपामि तव सरीरभोगं । तेणं विभायसमए संजमं गिन्हस्सामि ।
**( जंबू दिट्ठंते एकादसमो उद्देसो समत्तो )**

## बारसमो उद्देसो - सिद्धिबुद्धीदिट्ठंतो

तए णं **जंबू**पंचमी भारिया **नहसेणा** एवं वयासी – सामी ! कम्मियं अम्ह भोग तुम्मसरीरं विलग्गा । अहुणा न मुयामि । तए णं सुंदरीसरीरसद्धिं भोगं विलसेह । वल्लह ! अइलोहं तज्ज । मुत्ति अत्थि अम्हारिसी नत्थि । **जंबू** वयइ – ए सच्चवयणं ।

---

विज्ञाय वारिपानार्थं वानर्या सह मुखं कर्दमे प्रक्षिपति, प्रवेशयति । तदानीं तत्क्लिन्नकर्दमस्तन्मुखे विलग्नः, हस्तं प्रक्षिपति हस्तौ विलग्नौ । यथा यथा पश्चाच्छीतलं वपुर्भवति तथा तथा वानरवानर्यौ कर्दमेन लेपायेते । पुनस्तयोः पिपासा न नष्टा । सर्वं शरीरं कर्दमेन लिप्तमाच्छादितम् । तथापि तृषा न भग्ना । ततः पश्चाद्यथा यथा सूर्यरश्मयोर्लगति तथा तथा कर्दमो शुष्यति, शुष्को भवति, तथा तथा शरीरेऽतिव्यथां वेदयति । प्रियेऽहमेतादृग् मूर्खो नास्मि । तव शरीरभोगरूपपङ्केन न लिप्ये । तस्माद्विभातसमये जाते संयमं गृहीष्यामि । **( इति जम्बूदृष्टान्ते एकादशमोद्देशकः )**

ततो जम्बूभार्या पञ्चमी पाणिगृहीता **नभसेनैवं** बभाण – स्वामिन् ! कर्दमोपममच्छरीरभोगं त्वच्छरीरविलग्नमधुना यावन्नास्ति । ततोऽहं वदामि स्वामिन् ! सुन्दरीशरीरभोगसार्द्धं भोगानासादितान् विलसय । वल्लभ ! अतिलोभं त्यज ।

तुमं नवपंक असुअं। जे मुत्ति धम्मपंक सुइ। तेणं तुमं सारिसी मज्झमं नत्थि। तए णं **नहसेणा** वयइ-पाणनाह! लोहं न भव्वं। जहा **सिद्धि** तहा तुमं भविस्ससि। सामी सुणेह - को वि गामे **सिद्धि-बुद्धि** णामं दरिद्दिणी वसइ। परगेहकम्मकारी अण्णया ते **सिद्धि बुद्धि** गोरणट्ठाए गाम बाहिरमागया। तया णं को वि सत्थवाह सरतडे पासइ। से सत्थवाहजणा भुंजमाणा कीलइ कीलमाणा ते दरिद्दिणी विलोयइ। एवं चिंतइ। एस सत्थवाहजणा भुंजइ कीलइ किं कम्मफला। एवं अब्भत्थिमाणे को वि माहणापुच्छा, एस किं कम्मफला ? सो माहणो वयइ। सुरपूआफलं। ते वयणं सुच्चा **विणायगं** आराहेइ। तस्स गिहं लिंपइ। पुप्फं भत्तावेइ। छमासंतरिए ते दरिद्दिणी **बुद्धि**पइं संतुट्ठो। **बुद्धि** एवं वयासी - देव मम धणं दावेह। देवो वयइ - दिणे दिणे एग एग दीणारं गिण्हमाणे सुहं चिट्ठह। तए णं **बुद्धि** एवं

---

मुक्तिस्त्रीलोलुपो मा भव। अस्मत्सन्निभा मुक्तिवधूनास्ति। ततोऽस्मत्प्रार्थना सफला कर्तव्या। ततो **जम्बू** वदति - प्रिये! एतत् सर्वं वचनं प्रलापसदृशं भवत्प्रयुक्तं वाक्यम्, पापपङ्करूपमशुचिरूपं भवच्छरीरं मम न रोचते। अहं मुक्तिवधूं पूर्तीं परिणयितुमिच्छामि। तत्सदृश्यो यूयं न सन्ति। भवत्सौन्दर्यं पौद्गलिकमतोऽनित्यम्, तस्याः सौन्दर्यं सर्वदैकरूपमनन्तकालेऽपि न विघटयति, न वियुज्यते। अतोऽहं तामेव परिणयिष्ये। ततो **नभसेना** वदति - प्राणप्रिय! प्राणनाथ! बहुलोभो न भव्यः। यथा **सिद्धिबुद्धिस्त्रियौ** तथाऽतिलोभात् त्वमपि तद्वद्भविष्यति। स्वामिन्! श्रुणुत।

कस्मिञ्चिदनिर्दिष्टनाम्नि ग्रामे **सिद्धिबुद्धि**नाम्न्यौ दरिद्रिण्यौ परगृह-कर्मकारिण्यौ दुःखाजीविन्यौ स्त्रियौ निवसतः। अन्यदा **बुद्धिः** कार्यार्थं ग्रामस्य बहिरुपागता। तदानीं कोऽपि सार्थवाहः कासारतीर उत्तरितोऽस्ति। ऋद्धिवृद्धि-समन्वितस्तं सा पश्यति। ते सार्थवाहजना भुञ्जयन्तः, क्रीडयन्तः, सा दरिद्रिणी सादरं तान् पश्यति। मनस्येवं विचिन्तयति। एते सार्थजनाः कथं भोगान् भुञ्जन्ति, क्रीडन्ति, माद्यन्ति। किं कर्मफलमेतत्। महत्पुण्यमेतैः समाचरितं पूर्वजन्मन्यथेह-

विहरइ। धणड्ढा भूआ। अण्णया **सिद्धि** पुच्छइ – तुमं गेहं कहं एरिसं धणं। तया णं **बुद्धि** सरलभावं सव्वं निवेइयं। तया णं ते **सिद्धि** विसेसं **विनायगं** आराहेइ। कम्मेण संतुट्ठो। **सिद्धि** वयइ – सामी! **बुद्धि** दुगुणधणं मम अप्पेह। देवो वयइ – एवं भवउ। एवमेव दुवे विवाय लग्गा। दुगुणं दुगुणं रिद्धि जायइ। सुरं अप्पेइ। अण्णया **सिद्धि बुद्धि** उवरि विरोहं वहइ। अण्णया ते **सिद्धि** देवं पइ एवं वयासी– सामी! मम एगंखी करेह। देव वयइ – एवं भवउ। **सिद्धि** सुक्कंखी भविया। तउ पच्छा **बुद्धि** अयाणमाणी सुरं पइ एवं वयइ – जे अज्ज **सिद्धि**पइं दाविया ते मम

---

जन्मन्येवं विचिन्त्य कमपि सूत्रकण्ठं ब्राह्मणमापृच्छति। एतत्कि कर्मफलं महत्पुण्य-मेतैरनुभूयते। ब्राह्मणोऽवादीत् – वृद्धे! सुरपूजाफलम्, तद्वचनं श्रुत्वा **बुद्धिर्विनायकं** लम्बोदरमुपासत, आराधयति। प्रदीपधूपनैवेद्यैः पूजयते, अर्चयति। तद्देवालयं प्रलिम्पति पुष्पाद्यैरनिशं पूजां करोति। अतीवभक्तिपरा चैत्ये सन्मार्जनीं ददाति। इत्थं कुवन्त्यास्तस्याः षण्मासानन्तरमाखुगोदेवः सन्तुष्टः। **बुद्धिं** प्रत्यक्षीभूय एवमवादीत् – **बुद्धे**! मार्गय त्वदीप्सितमहं दद्मि। ततः साऽब्रवीत् – स्वामिन्! मम धनं देहि। ततो देवोऽवादीत् – बुद्धे! प्रतिदिनमेकं दीनारं गृह्णन्ती उपाददन्ती सुखेन संतिष्ठ। ततो **बुद्धिरेवं** प्रतिदिनमेकं दीनारमुपाददन्ती विचरति। साऽनुक्रमे-णातीव धनाढ्या जाता। अन्यदा **सिद्धिर्बुद्धि**मापृच्छति – **बुद्धे**! त्वद्गृह एतादृशी धनसम्पत्ति कथं जाता। त्वमिदृशी धनाढ्या जाता तत्कारणं मां वद। ततः सा **बुद्धिः** सरलस्वभावादकुटिला सर्वं तत्स्वरूपं निवेदितम्, प्रख्यापितं कारणम्। ततः सा **सिद्धि**रपि विशेषभक्त्या **विनायक**माराधयति पूजयति च। क्रमेण तस्या अपि सन्तुष्टो हृष्टो देवः प्रत्यक्षरूपेणावादीत् – मार्गय **सिद्धे**! स्वेप्सितम्। तदानीं साऽवदत् – स्वामिन्! सन्तुष्टोऽसि चेत्तदा **बुद्धे**र्द्विगुणं वित्तं मेऽर्पय। देवोऽवादीत् – इत्थमेव भवतु। एतद्रीत्या ते द्वेऽपि विवादलग्ने द्विगुणीं द्विगुणीं ऋद्धिं याचतः। सुरोऽप्यर्पयति। अन्यदाऽवसरे **सिद्धिर्बुद्धे**रुपरि विरोधं विरूपं चिन्तयति, वहति। साऽन्यदा **सिद्धि**र्देवं प्रत्येवमवादीत् – स्वामिन्! मामेकाक्षीं कुरु। देवो वदत्येवं

दुगुणं दावेह। तया णं सुरे दो अच्छी मुसीया। अंधीभूआ। तहा सामी! लोहे तुम्मं अम्हसुहं सिद्धिसुहं दुवे चुक्किस्सइ। तेणं इहगेहं सुहं मा मुंचह। सिद्धिसुहं मा इच्छह। पच्छा जरासमए सिद्धिमग्गं गिन्हस्सामो। **( जंबूदिट्ठंते बारमो उद्देसो समत्तो )**

## तेरसमो उद्देसो - जाइतुरंगमदिट्ठंतो

तए णं **जंबू नहसेणा** पइं पत्तुत्तरं भासइ - पिया! अहं जाइ-तुरंगमसमाणो भविस्सामि। तया णं **नहसेणा** वयइ - सामी! ते को वि जाइतुरंगमो ? **जंबू** वयइ-इहेव **जंबूद्दीवे** द्दीवे **भारहे** वासे **वसंतपुरे** नयरे **जियसत्तु** राया। तस्स रायगिहे

---

भवतु। ततः **सिद्धिरे**कलोचना जाता। ततः पश्चा**द्बुद्धि**रजानाना सुरं प्रत्येवमवादीत्-स्वामिन्! अद्य **सिद्धिं** प्रति दत्तं तन्मम द्विगुणं देहि। तदानीं सुरेण द्वेऽप्यक्षिणी मुषिते, हृत इत्यर्थः। किं बहुना, अन्धा जाता। गताक्षा जातेत्यर्थः। तथा स्वामिन्न-तिलोभाद्भवतां सुखसिद्धिसुखे द्वेऽपि विनश्यतः। द्वाभ्यां भ्रष्टो भविष्यस्यतिलोभात्त-स्मादस्मदुक्तं गृहसुखं मा त्यज। सिद्धिसुखं मेप्सितः। पश्चाज्जरासमये सिद्धिमार्गं संयमं गृहीष्यामोऽनुसरिष्यामः। **( जम्बूदृष्टान्ते द्वादशमोद्देशकः )**

ततो **जम्बू नभसेनां** प्रत्येवमवादीत् - श्रुणु प्रियेऽहं जात्यतुरङ्गसमानो भविष्यामि। तत्रैव **भारते** वर्षे **वसन्तपुरे जितशत्रुराजा** परिवसति। सुखेन राज्यं पालयति। तस्य राज्ञो निकेतन एकस्तुरङ्गमोऽभवत्। लक्षणैरुत्तमो निर्मांसमुखमण्डलः, लघुकर्णः, परिमितमध्यः, वक्रमुखः, स्निग्धरोमः, अनेकप्रशस्तसमस्ताऽश्वगुणा-लङ्कृतस्कन्धादिकपुष्टः, कृष्णवर्णाद्यनेका एते तुरङ्गमगुणास्तैरुपेतः, विपरीताऽवगुणाः। यस्य वेश्मनि मनुष्यो वाऽश्वो वा स्त्री वा पुत्रो वा सुलक्षणो भवति तस्य गृहे सुखं प्रचुरं भवति। ऋद्धिवृद्धिकान्त्यादि तद्गृहे विवर्द्धयते। विपरीताऽवगुणैर्वैपरीत्यम्। **तत्र जिनदत्त**नामा श्रावकः श्रमणोपासकः निवसति। स वाजी तद्गृहे विशेषतः सन्मार्गगमनशिक्षापनार्थं स्थापितो रक्षितः। स श्रावकोऽश्वपरीक्षाऽश्वलक्षणगति-

एग तुरंगम होत्था। सुलक्खणा, अणेगगुणे कुसला, किसिकण्णा, वक्कमुहा, खंध अहिया। सकोहा एस तुरीअ- गुणा माणव अवगुणा। जेण गेहे तुरीय इत्थी पुत्त सुलक्खणे भवइ, तस्स गेहे सुहं भवइ। से तुरंगम रायाए **जिणदत्त**गिहे ठाविंओ। विसेस सुमग्गसीखणट्ठाए। ते आसए समणोवासए सिक्खाविओ। विसेसलक्खणो भूओ।

तेण समए कति जोअणंतरिए **जियसत्तु** रिपुराया परिवसइ। तेण रायाए आस वियाणीओ। से णयरे अघोसं घोसाविआ जे पुरिसा **जियसत्तु** गिहे सुलक्खणं आसं इह आणइ। तस्स गामं नयरं दावेमि। तया णं एग सुहडे पाणि गिन्हइ। सिग्घं

---

शिक्षापनकुशलस्तत्र पञ्चगतयस्तुरङ्गाणां क्रमाद्धौरितवल्गितप्लुतउत्तेजितरेचितम्, तत्र धौरितकं धौर्यगमनम्, रथतुरङ्गमगमनम्, १ नकुलकङ्कशिखिकमटवत्कवद्गतिवल्गितमुच्यते, २ अग्रकायसमुल्लासाकुञ्चितास्यं नतत्रिकं प्लुतं ३ पक्षिमृगगत्यउ(?)-हारकमुत्तेजितं ४ मध्यवेगेन या गतिस्तद्रेचितं गमनं ५ ततस्ता सर्वाऽपि गतयः शिक्षिता अश्वेन। तेन **जिनदत्त**श्रमणोपासकेन शिक्षापिता, विशेषतोऽश्व सुलक्षणैरुपेतो जातः।

तस्मिन्नवसरे कति योजनान्तरेषु **जितशत्रु**राज्ञो रिपुराजा विपक्षनृपः परिवसति। तेन शत्रुराज्ञा तमश्वं सम्यक्शिक्षितं विज्ञाय तमानयनार्थं स्वकीय पुरान्तरे दस्यूद्घोषणा दापिता। पटहो वादितो यो पुरुषः सुभटो **जितशत्रु**राज्ञः प्रासादात्सुलक्षणमश्वमिहानयिष्यति तस्य द्रङ्गो वा ग्रामो वा खेटो वा कर्बटो वा मया दीयते। तदेकेन सुभटेन राज्ञोक्तवचः श्रुत्वा पणः कृतोऽहमवश्यमश्वमानयामीति कृतप्रतिज्ञ इत्यर्थः। ततः शीघ्रं **वसन्तपुरं** समायातो यत्र **जिनदत्त**श्रमणोपासकगृहम्। यत्र चाश्वस्थानं तत्र दृक्पातं कुरुते चौर्यवृत्त्या। अन्यदा लब्धावसरोऽसौ यत्राश्वस्थानं तत्पृष्ठिद्वारं वाजिशालाप्राक्द्वारमुद्घाटयति। ततो मध्यशालायां क्षात्रपातेन सन्धिदानेनाभ्यन्तरा प्रविशति। ततो यत्राश्वोऽस्ति बहुयत्नेन सुरक्षितस्तत्रैवोपागच्छत्युपागत्याश्वं विलोकयति। रश्मिबद्धमुत्कीलयति छोटयति। उत्कील्य चाश्वपृष्ठो पर्यारोहति। ततः स सुभटोऽश्वोपर्यारुह्य प्रतोदप्रहारेण प्रेरयति। तमश्वं प्रहारयति,

**वसंत**मागयो। **जिणदत्त**गिहआसठाणं विलोयइ। तेण सुहडे अण्णया ते आसठाणे पुट्ठिं दुवारं विहाडेइ **खात अयणामं** जेणेव ते आसक तेणेव उवागच्छइ। आसं विलोयइ। बंधं विछोडइ। आसपुट्ठिं चिट्ठइ। ते सुहड आसएण कसप्पहारेइ। तओ णं ते आस न उम्मग्गं चलइ। ते सुहड विविहविहं करेइ। पुण आस उम्मग्गं न चलइ। तया णं समणोवासिय वियाणीया। से सुहड वयइ। पणट्ठो। तहा पिया! तुमे ते चोरसारिच्छी कातरमणं तुरंगमसारिच्छे। ते तुमं अमग्गं वयणं न मन्नइ। जे सुपुरिसमण जाइतुरंगमसारिच्च्छे अहं तुमं वयणे अहं कामउमग्गा न चलामि। तया णं **नहसेणा** एवं वयइ। सामी! एस कामभोगे उमग्गा किं भासइ। जेण मग्गे तित्थयरे कामभोगा विलसिय पच्छा सिद्धिमग्गं साहियं ते कामभोगं कहं उम्मग्गं।

---

नोदयति, तोदयति च। तथापि सो वाजी विपथोन्मार्गे न प्रचलति, न गच्छति। स सुभटो विविधानुपायान् करोति। तमश्वं क्लेशयति, त्रासयति, ताडयति तथाप्युन्मार्गे न प्रचलति। किं बहुना, कदर्थनामनल्पां करोति परं सोऽश्वो मार्गमुत्सृज्यैकपदमप्युन्मार्गे नायाति न यातीत्यर्थः। उन्मार्गे सर्वथा न गच्छति।

अथ पश्चा**ज्जिनदत्त**श्रमणोपासकश्चौरेणापहृतमश्वं विज्ञाय स्वयं तत्कालं तत्पृष्ठे चटितः। तूर्णं चौरः सविषयं च प्राप्तः। ततः स सुभटस्तं **जिनदत्त**श्रावकं सन्नद्धबद्धकवचं सखड्गं सबाणधन्विनं सविधसमेतं पश्चाद्विज्ञायाश्वं मुक्त्वा पलायितः, प्रणष्टः। स्वप्राणजीवं लात्वा गतः। ततः स श्रमणोपासकोऽश्वोपर्यारुह्य स्वस्थाने समानीय तेन निबद्धः संयन्त्रितः। तथा हे प्रिये! यूयं चौरसदृश्यः कातरनरमनोऽजात्यतुरङ्गमसमानं यः कातरो भवेत् स भवद्वचनमुन्मार्गसदृशं मनुते। यः सत्पुरुषो भवेत्तस्य मनो जात्यतुरङ्गमसदृक्षम्। ततोऽहमपि जात्याश्वसदृक्षो भवद्वचने कामभोगप्रार्थनारूपोन्मार्गे न व्रजामि। तदानीं **नभसेनै**वं प्रियं प्रति वदति – स्वामिन्नीदृशा कामभोगा उन्मार्गसधर्मत्वेन कथं कथ्यन्ते, भाष्यन्ते? यस्मिन्मार्गे तीर्थङ्करादयः पुरुषाः प्राप्ताः। प्रथमतः कामभोगान् विलसयित्वा भुक्त्वा पश्चात्सिद्धिमार्गं साधयामासुः। तेऽप्ये एतान् कामभोगान् भुक्त्वा पश्चात्तैरपि सिद्धिमार्गं

तम्हा इह गिहे सुहं भुंजह। **जंबू** वयइ – अहं तुमं भोगं चइत्ता संजमं विहरिस्सामि।
**( जंबू दिट्ठंते तेरसमो उद्देसो समत्तो )**

## चउदसमो उद्देसो – विप्पपुत्तदिट्ठंतो

तया णं **जंबू** छट्ठी भारिया **कणगसिरी** एवं वयासी – सामी! **विप्पपुत्त** इव मूढं मा भवह। वल्लह सुणेह। को वि गामे विप्पगामहट्टं वसइ। तस्स पुत्त मूढ अत्थि। तस्स पिया परलोअं गया। तया णं तस्स अम्मा पुत्तपइं एवं वयासी – पुत्ता! पंडियं भव। पुत्ता जे कज्जं गिन्हइ स कज्जं असिद्धं न मुंचइ। पुत्ता ! पंडिय एस

---

साधितम्। ते कामभोगाः कथमुन्मार्गत्वेन प्ररूप्यन्ते। तस्मादिह गृहे ससुखं भोगान् भुङ्क्ष्व। ततो **जम्बू** वदति – प्रिये ! अहं भवद्भोगं त्यक्त्वा संयममाश्रयिष्यामि निश्चयेन। **( इति जम्बूदृष्टान्ते त्रयोदशमोद्देशकः )**

ततोऽनन्तरं **जम्बुषष्टीभार्या कनकश्री**त्थमवादीत् – स्वामिन्! विप्रात्मजवद् मूढो मा भव। वल्लभ ! श्रुणुत। कस्मिन् ग्रामे कोऽपि विप्रोऽतिदुःस्थो निवसति। तस्य सुतोऽतीव मूढोऽस्ति। तत्पितायुःक्षये परलोके गतः, मृतरित्यर्थः। तदानीं विप्राङ्गजमाता तं सुतमेवं वदति – पुत्रः जनकस्तव स्वर्गे गतः। अथ त्वं पण्डितो भव। सुलक्षणः सुविचक्षणः स्वकार्यसाधको भव। भो पुत्र ! यत्कार्यमङ्गीक्रियते, प्रतिपद्यते, ईषदपि कार्यं प्रारभ्यते तन्नासिद्धं मुच्यते। प्रारब्धस्यान्तगमनमिति बुद्धिलक्षणम्। बहुविघ्नैरपि तत्कार्यं न परित्यज्यते। प्रथमतोऽशक्यं कार्यं न प्रारभ्यत इति प्रथमं बुद्धिलक्षणम्, चेत्प्रारब्धं तदा प्रान्तभावेन पारायणेन नीयत इति द्वितीयलक्षणम्। उक्तम् –

**★ अनारम्भो मनुष्याणां प्रथमं बुद्धिलक्षणं।**
**प्रारब्धस्यान्तगमनं द्वितीयं बुद्धिलक्षणम्॥** इति नीतिरीतिः॥

निपुणवाक्यस्मरणादीदृशाचरणमेव नाचरणीयम्। इत्थं हितोक्त्या सुतं शिक्षयति माता। ततः सुतो वक्ति–अम्बे ! त्वद्वचनं मया तथैवेति प्रतिपन्नम्। ततः स मूर्खो विप्रसुतो ग्रामान्तरा विचरति।

लक्खणं। पुत्तं वयइ – अम्मा तहत्ति। ते मूढपुत्ते गाममज्झे विहरइ। अण्णया पजापइ गिहाओ रासह पणट्ठो। पजापइ धावियो रासहं गिन्हावइ। तया णं ते मूढविप्पपुत्त समुहं पासइ। पजापइ वयइ – विप्पा! एस रासहं गिन्हह। ते वयणं सुच्चा विप्पपुत्ता धावमाणे रासहपुच्छं गिन्हइ। रासहं पणट्ठइ। विप्पपुत्तस्स रासह पयं पहारेइ। तओ पुच्छं न मुंचइ। पयप्पहारं अणुभवइ। पुण पुच्छं न मुंचइ। तया णं गामजणा एवं वयइ – मूढ! पुच्छं मुंचह। तया णं ते विप्पपुत्त गामजणा पइं एवं वयासी – तुमे मूढा गहियं कज्जं अहं न मुंचामि। मम अम्मा एवं भासियं। गहियं

---

अन्यदा प्रजापतिगृहाद्रासभः प्रणष्टः। रथ्यान्तरा प्रजापतिस्तत्पत्कटितुं धावितः। रासभो न ग्राहयति। प्रणष्टो यात्यग्रे। तदानीं कुलालेन दृष्टो विप्रमूढसुतः सन्मुखमागच्छन् रथ्यान्तरा। तदा प्रजापतिरवदत् – भो विप्रसुत! रासभं कर्णाभ्यां सङ्गृहाण। तद्वचनं श्रुत्वा विप्रमूढसुतो गलिकायां तत्पृष्ठौ धावमानो रासभं पुच्छेन गृह्णाति। पुच्छं संवाहयतीत्यर्थः। तदा रासभः प्रणष्टः। प्राक्पद्भ्यां विप्रहारयति तदापि मूढो न मुञ्चति पुच्छम्। पदलत्ताप्रहारमनुभवति। तत्पदप्रहारार्दितोऽपि बहुतरं तदापि तत्पुच्छं न मुञ्चति। तदा ग्रामीणजनास्तं प्रत्येवं वदति – भो विप्रमूढसुत! मन्दभाग्य! गर्दभपुच्छं मुञ्च। तदानीं स विप्रमूढसुतस्तानेवमवादीत् – भो जना! यूयं मूर्खाः, गृहीतं कार्यं मुञ्चत, पुनरहं मूढो नाऽस्मीति स्वाङ्गीकृतं शुभमशुभं वा न मुञ्चामि। मन्मात्रैवं भाषितमस्ति। पुत्र! गृहीतकार्यं न मुच्यते स्तोकं महद्वा। मातृशिक्षाक्षरवचनं न लोपामि। ततः स्वामिन्! सो मूढो विप्रसुतो रासभलत्ताप्रहारेणात्यन्तपीडां सहते। तथा त्वमपि स्वामिन्! साधुवचनं न मुञ्चसि तदा विप्रसुत इव त्वमपि भविष्यसि। तस्मात्स्वामिन्! उत्तमलक्षणलक्षिताः पुरुषाः क्षणेन गृह्णन्ति, ततो मुञ्चन्ति, हठं न कुर्वन्ति। तस्मात्स्वामिन्! गृहे सुखेन तिष्ठ। पश्चात्संयमं गृहीष्यत। बलात्कार्ये समागते हानिरुत्पद्यते। यतः –

**★ सहसा विदधीत नो क्रियामविवेकां परमापदां पदम्।**
**वृणुते हि विमृश्यकारिणं गुणैर्लुब्धाः स्वयमेव संपदः ॥ १ ॥**

न मुंचइ। सामी ! ते विप्पपुत्त बहु रासहं पीडइ। तहा तुमं साहुवयणं न मुंचइ। पुण विप्पपुत्त इव भविस्सइ। तम्हा सामी उत्तम पुरुस खणं गिण्हइ। तम्हा गेहे सुहं चिट्ठह। पच्छा संयमं गिण्हस्सह। **( जंबू दिट्ठंते चउदसमो उद्देसो समत्तो )**

## पनरसमो उद्देसो - विप्पदिट्ठंतो

तए णं **जंबू कणगसिरी** पइ पत्तुत्तरं भासइ - पिया! **विप्पा** इव दासं न भवामि। **कणगसिरी** वयइ - को विप्प ? सामी! मम उवदंसेह। **जंबू** वयइ - इहेव **भारहे** वासे **कुसत्थल** गामे **खित्ती** परिवसइ। तस्स गेहे एग तुरंगमी होत्था। तुरंगी सुलक्खणी। तुरंगी विण्णाणयट्ठाए एग पुरिसो ठावियो। सया तुरंगी संभालणट्ठा करेइ। ते तुरंगी वाएइ। जे खित्ती असणं दावेइ तस्स मज्झे से पुरिसे असणं नियासइ। विक्केइत्ता भक्खेइ। तया णं ते तुरंगी किसी भूआ। अकाले ववरोविया ते तुरंगी कालं किच्चा वेसा समुप्पन्ना। अइवरूवं, बहुजणमणमोहणी सुहेण विहरइ। ते तुरंगी विणय-पुरिसो कालं किच्चा माहणीपुत्त भूओ। ते माहणेणं अण्णया ते

---

इति वचनादीदृशमाचरणमनाचरणीयम्। तस्मात्स्वामिन्! वारं वारमस्माभिर्निगद्यते जरावस्थायां संयमं गृहीष्यध्वम्। **( इति जम्बूदृष्टान्ते चतुर्दशमोद्देशकः )**

ततो **जम्बू कनकश्रियं** प्रत्युत्तरं भाषयति - प्रिये ! अहं **विप्र** इव दासो न भवामि। **कनकश्री** वदति - स्वामिन्! को विप्रो ममोपदिशत। **जम्बू** वक्ति - इहैव **भरते कुशस्थलग्रामे क्षत्री** परिवसति। तस्यैका गृहे वडवाऽभूत्। सा सुरङ्गी सुलक्षणा तुरङ्गीलक्षणैरन्यूनालङ्कृता। तुरङ्गीं शिक्षयितुमनुशासयितुमेकं पुरुषं रक्षयति स्थापयति। अथ स नरस्तुरङ्गीं पालयति, अनुशासयति च। तस्या सम्भालनां लोहकङ्कतादिना केशमार्जनादिकां प्रतिपत्तिं करोतीत्यर्थः। अथ तस्यास्तुरङ्गीनिमित्तं स क्षत्रियो यदशनादिदानकं दापयति विनेतारम्, तस्मिन्मध्ये स विनेता नरोऽशनं निष्कासयति, विक्रीणाति भक्षयति तद्दानकम्। तदा साऽश्वी कृशीभूता दुर्बलाऽकाले व्यपरोपिता विपन्ना इत्यर्थः।

वेसं पासइ। मोहं गयो। ते माहणो वेसा पइ पत्थणा करेइ। तया णं ते वेसा कुरूवं माहणं न इच्छइ। पुणरवि माहणो पत्थणा करेइ। दुच्चं पि तच्चं पि वेसा पइं इच्छइ। सा वेसा माहणं न कंखइ। तओ पच्छा पुव्वरिणसंबंधि ते माहणो वेसागिहे दासकम्मं करेइ। अइवकुरूवं, दोभागी नामं दासवित्थरियाए पुव्वरिणफला। जीवेण संबंधि परघरं पुत्तं भवइ। कलत्तं भवइ। बंधवं मित्तं भवइ। रिणे परघरवासं भवइ। परगिहे दासं भवइ। पिया ! तहा अहं तुमं सरणं नत्थि। अहं तुमं दासं न भवामि। तया णं **कणगसिरी** वयइ – सामी ! जे भारीया भत्तारं दासं करइ। ते

---

ततः सा तुरङ्गी कालं कृत्वा वेश्यात्वेन समुत्पन्ना। अतीव सुरूपाऽनुक्रमेणाधिगतयौवना बहुजनमनमोहिनी जनचित्तोन्मादिका सुखेन विचरति। अथ तुरङ्गीविनेता शिक्षयिता पुरुषः कालं कृत्वा तस्मिन्नेव नगरे ब्राह्मणत्वेन समुत्पन्नः। अन्यदा प्राप्तयौवनोऽसौ ब्राह्मणस्तां सुरूपां पण्याङ्गनां पश्यति, दृष्ट्वा च मोहभावमुपागतो ब्राह्मणो गणिकां प्रति कामभोगप्रार्थनां करोति। तदानीं सा गणिका तं कुरूपमलावण्यमसौभाग्यं नेच्छति। ततो पुनरपि ब्राह्मणस्तां स्वकामाभिलाषं पूरयितुं प्रार्थयति द्वित्रिर्वारं वेश्यां प्रति परं सा न वाञ्छति नाङ्गीकरोति च। बहुप्रार्थना तेन विविधप्रकारैः कृता परं सा वारवधूर्ब्राह्मणं दुर्भागिनं न काङ्क्षति नो मनोवाक्कायबुद्ध्या। ततः पश्चात्पूर्वर्णसंयोगात्स विप्रो वश्यः कामुको वेश्यावेश्मनि प्रेष्यकर्म करोति। अतीवकुरूपो दौर्भाग्यनामा दासत्वेनापयशो विस्तृतः। पूर्वर्णफलसंयोगाज्जीव ऋणसम्बन्धात्परगृहे पुत्रत्वेन भवति। कलत्रत्वेन भार्यात्वेन मित्रत्वेन भवति। पूर्वर्णसंयोगात्परगृहे दास्यकर्मत्वेन दासो वा संभवति। प्रिये ! तथाहं भवदाधीनो भवद्वश्यो नास्मि। किं बहुना भवत्प्रेष्यत्वेन न भवामि। यथा

**★ श्वेताङ्गुलिर्बकोड्डाही तीर्थयात्रासु किङ्करः।**
**दहनोंरीखणश्चैव षडेते गृहिणीवशाः ॥ १ ॥**
**सेयंगुलि बगुड्डावे किंकरे ण्हायाए तहा।**
**गिद्धावरंखि हदन्नए य पुरिसाहमा छाउ ॥पिण्ड नि. ४७१॥**

कुकलत्ता, कुभारिया, अणायारणी । अम्हे तुमं देव इव कप्परुक्ख इव आराहिज्जस्सामो । आजम्मकाले किंपि आएसं न दाइस्सइ । तम्हा गिहं चिट्ठह । **जंबू** वयइ – भो भारिया! मम कामं न रुयइ । संजमं गिण्हिस्सामि । ( **जंबू दिट्ठंते पण्णरसमो उद्देसो समत्तो** )

## सोलसमो उद्देसो – पंखीदिट्ठंतो

तया णं **जंबू** पइं सत्तमी भारिया **रूवसिरी** एवं वयासी – सामी ! पंखी इव मा साहसं कुरु, ए दिट्ठंते मा करेह । को वि पव्वए एग गुहामज्झे वग्घं वसइ । जया णं ते वग्घं दिवा सयइ निद्दावसे भवइ तया णं वग्घ मुहं वियसिया निद्दइ। तया णं को वि सेयाणपंखी धीरचित्तं करेमाणे ते वग्घमुहं पविसेइ । ते वग्घमुहं दंतमज्झे

---

तदानीं **कनकश्री जम्बूं** प्रति वदति – स्वामिन् ! या स्त्रियो भर्तारं दासं कुर्वन्ति ताः स्त्रियः कुभार्या अनाचारिण्योऽपतिव्रतधर्मधारिण्योऽकुलीनाः । अहो वल्लभ ! यूष्माकम् देवकल्प इव कल्पवृक्ष इव चिन्तामणिरिवाराधयिष्यामः, पर्युपासिष्याम, आजन्मकालमारभ्याऽऽदेशवर्तिन्यस्त्वदाज्ञाकारिण्यो भविष्यामः । चेटीवत् त्वत्कार्यकारिण्यः तस्मात्प्राणेश स्वामिन् ! गृहे तिष्ठ । ततो **जम्बू** वदति – भो भार्या मम कामभोगा न रोचते । अवश्यं संयममेव गृहीष्यामि । ( **इति जम्बूदृष्टान्ते पञ्चदशमोद्देशकः** )

ततो **जम्बूपत्नी** सप्तमी **रूपश्री** एवमभाषिष्ट – स्वामिन् ! वल्लभ ! पक्षीव साहसं मा कुरु पक्षिदृष्टान्तं मा कुरुत, विदधीत । स्वामिन्! श्रुणुत । एकस्मिन्नद्रावेकस्यां गुहायां कन्दरायामन्तरा व्याघ्रो निवसति । यदा च स व्याघ्रो दिवा स्वपिति, प्रमीलां करोति निद्रावशो भवति । तदानीं तस्य मुखं विकसितम् । स व्याघ्रो यथेच्छं शेते तदा तस्य स्फाटितं मुखं भवतीत्यर्थः । तदानीं कोऽपि श्येनकपक्षी धीरचित्तं साहसं कुर्वन् तद्व्याघ्रमुखे प्रविशति । केनापि हेतुना तस्य व्याघ्रस्य मुखदशनावलीमध्ये मांसपेश्ये दन्तान्तरा लग्ना भवन्ति । तत्पलं श्येनकोऽत्ति भक्षयति । पुनर्बहिर्निष्क्रामति, निर्गच्छति । निष्क्रम्य पुनरपि प्रविशति । निर्गत्य श्येनक एवं वदति – अहो जगज्जन्तवो

मंसं अत्थि। ते मंस सेयाणयं भक्खइ। पुणरवि नियासइ पुणरवि पविसइ। से सेयाणं एवं वयइ - अहो! जीव! साहसं मा कुरु। सामी ते पंखी एवं भासइ पुणरवि वग्घमुहं पविसइ। नियासइ पुणो वि वग्घमुहं पविसइ। सामी! तहा तुमं करिस्ससि। वारं वारं अम्हे भासिस्सामो। सामी! गिहं चिट्ठह। सुहं भुंजह। तहा तहा तुमं न मण्णसि। वल्लह! जउणं अम्हे पाणिगिन्हामो तउ णं अम्ह सद्धिं सुहं भुंजह। मा साहसवयणं पंखी इव मा भवह। सामी जरासमए पच्छा संजमं विहरिस्सामो। **( जंबू दिट्ठंते सोलसमो उद्देसो समत्तो )**

## सत्तरसमो उद्देसो - तिण्णिमित्तादिट्ठंतो

तए णं **जंबू रूवसिरी** पइ पत्तुत्तरं भासइ - भारिया! अहं धम्मं सद्धिं मित्ति करेमि। जहा तिण्णि मित्ता तहा धम्ममित्तं मम रोयइ। तया णं **रूवसिरी** एवं

---

मा साहसं कुरुत। कस्यापि न विश्वासो कर्तव्यः। इत्युक्त्वा स्वामिन्! स श्येनो मुखे पुनरपि प्रविशति पुनरेवं भाषते, वदति - मा साहसं कुरुत। पुनस्तस्य मुखे प्रविशति पुनर्निर्गत्यागत्य शिखरे समुपविश्यैवं वदति - मा साहसं कुरुत। स्वामिन्! तथा यूयमपि करिष्यथ! वारं वारं वयं भाषयामो वदामः। स्वामिन्! गृहे तिष्ठ सुखं भुङ्क्ष्व। तथा तथा यूयं न मन्यत वल्लभ! यदा चास्माकं पाणिगृहीता परिणीता तदाऽस्मत्सार्द्धं सुखं विलसय। भुञ्जय। मा साहसं पक्षीवचनमिव मा भव। स्वामिन्! जरासमये पश्चात्संयमे विहरिष्यामः। **( इति जम्बूदृष्टान्ते षोडश-मोद्देशकः )**

ततो **जम्बू रूपश्रियं** प्रत्युत्तरं भाषयति - प्रिये! अहं धर्ममित्रसादर्धं मैत्रीं करिष्यामि। यथा त्रयाणां मित्राणां मध्ये धर्ममित्रो रोचते। तदानीं **रूपश्री** एवं वदति - स्वामिन्! के त्रयो वयस्या ममोपदिशत। **जम्बू** वक्ति -

इहैव **जम्बूद्वीपे** द्वीपे **भारते** वर्षे **सुग्रीव** नाम नगरमस्ति। तत्र **जितशत्रु** नामा राजा। तस्य **सुबुद्धि** नाम्नाऽमात्यस्तस्य त्रीणि मित्राण्यभवन्। मित्रैस्तैः सार्द्धममात्यः सदा स्वपिति, उपविशति, व्रजति, तिष्ठति च। तेऽपि सहचराः

वयासी – सामी ! ते को वि तिण्णि मित्ता ? मम उवदंसेह । **जंबू** वयइ – इहेव **जंबूद्दीवे** द्दीवे **भारहे** वासे **सुग्गीव** नामं नयरे **जियसत्तु** णामं राया । **सुबुद्धि** णामं मंति । तस्स तिण्णि मित्ता होत्था। तं जहा – एग निच्च सया सद्धिं चिट्ठइ । सयइ । आसइ । अन्नोन्नं एगं एगं विणा न रुयइ तेण निच्चनाम मित्ते । एग मित्त पव्वदिणे जया णं मंतिगेहे पाहुणाइ मंगलसमए ते मित्त सद्दावेइ । भुंजावेइ । ते **पव्वमित्ते** नाम । एगं मित्ते एगदिण मज्झे एगवार पणामेइ । कुसलं पुच्छेइ । ते **जुहारमित्ते** नाम । एए तिण्णि मित्ता मंतिया होत्था । निच्चमित्तो अइव वल्लहो । तए णं पव्वमित्तो वल्लहो । जुहारमित्तो किंचि वल्लहो । इमं तिण्णिमित्ता सह मंत्ति विहरइ ।

---

अमात्यसार्द्धं तिष्ठन्ति, स्वपन्ति, परस्परमहर्निशं परममैत्र्या सह विचरन्ति । किं बहुनैकैकं विना क्षणमात्रमपि न सहते, विरहन्ते । सुहृदो यदानीं पर्वोत्सवदिने मन्त्रिगृहे प्राघूर्णकादयः समायान्ति मङ्गलसमये । तदानीं मन्त्री तान्सुहृद आमन्त्रयित्वा स्वगृहे भोजनं च कारापयति । ते सुहृदः के के ? एकः पर्वमित्र नामैको जुहारमित्रनामैको नित्यमित्रनामा । यस्तत्र पर्वमित्र नामा स एकस्मिन्वासरमध्य एकवारं प्रणमति । यो जुहार नामा स एकस्मिन् दिनमध्ये द्विवारं त्रिवारं प्रणमति । कुशलं च प्रश्नं च करोति । नित्यमित्र नामा यदा तदा प्रणमति । एते त्रय सुहृदोऽभवन् ।

